3४८

(1)

॥अथ विश्वकर्मप्रकाशो भाषाटीकान्वितः प्रारभ्यते॥

अथ विश्वकर्मप्रकाशविषयानुक्रम[illegible]का।

इति विश्वकर्मप्रकाशविषय[illegible]नुक्रमाणिका सम[illegible]ना।

5

श्रीगणेशाय नमः ॥ वरकी दाताहै मूर्ति जिसकी और मंगलोंका मंगल जो श्रीगणेश सो जयको प्राप्तहो। सबके नमस्कार करने योग्य ब्रह्मरूप सरस्वती जयको प्राप्तहो और चेतन और मोक्षरूप तीनों भुवनोंकी माता जयको प्राप्तहो और वाङ्मय महेश्वर मुझे शब्दरूपका ज्ञान करो ॥ १ ॥ ब्रह्माके भुवनपर्यंत जितने लोकहैं वे गृहस्थाश्रमके जिससे आश्रय हैं तिससे मैं गृहके आरंभ और प्रवेशके मुहूर्तको ॥ २ ॥ कहताहूं-हेमुनिश्रेष्ठ ! तुम एकाग्रमन होकर श्रवणकरो-जो प्राचीन वास्तुशास्त्र महादेवने कहाहै ॥ ३ ॥ वह पराशर ऋषि

॥ श्रीगणेशाय नमः ॥ जयतिवरदमूर्तिर्मङ्गलम्मङ्गलानांजयतिसकलवन्द्याभारतीब्रह्मरूपा ॥ जयतिभुवनमाताचिन्मयीमोक्षरूपा दिशतुममहेशोवाङ्मयःशब्दरूपम् ॥ १ ॥ आब्रह्मभुवनाल्लोकागृहस्थाश्रममाश्रिताः ॥ यतस्तस्माद्गृहारम्भप्रवेशसमयंब्रुवे ॥ २ ॥ प्रवक्ष्यामिमुनिश्रेष्ठशृणुष्वैकाग्रमानसः ॥ यदुक्तंशंभुनापूर्ववास्तुशास्त्रंपुरातनम् ॥ ३ ॥ पराशरः प्राहबृहद्रथायबृहद्रथःप्राहचाविश्वकर्मणे ॥ सविश्वकर्माजगतांहितायप्रोवाचशास्त्रंबहुभेदयुक्तम् ॥ ४ ॥ ॥ विश्वकर्मोवाच ॥ वास्तुशास्त्रंप्रवक्ष्यामिलोकानांहितकाम्यया ॥५॥ पुरात्रेतायुगे ह्यासीन्महाभूतंव्यवस्थितम् ॥ स्वाप्यमानंशरीरेणसकलम्भुवनन्ततः ॥६॥ तन्दृष्ट्वाविस्मयन्देवागताःसेन्द्राभयावृताः ॥ ततस्तेभयमापन्नाब्रह्माणंशरणंययुः ॥ ७ ॥ भूतभावनभूतेशमहद्भयमुपस्थितम् ॥ क्वयास्यामःक्वगच्छामोवयंलोकपितामह ॥ ८ ॥

ने बृहद्रथको कहा और बृहद्रथने विश्वकर्माको कहा-और वह विश्वकर्मा जगत्के कल्याणके लिये अनेक भेदोंसे युक्त वास्तुशास्त्रको कहते भये ॥ ४ ॥ विश्वकर्मा कहतेहैं कि जगत्के कल्याणकी कामनासे वास्तुशास्त्रको कहताहूं ॥ ५ ॥ पहिले त्रेतायुगके बीचमें एक महाभूत व्यवस्थित हुआ (उठा) उसने अपने शरीरसे संपूर्ण भुवनको शयन करादिया ॥ ६ ॥ उस आश्चर्यको देखकर भयकरके सहित इन्द्रआदि देवता आश्चर्यको प्राप्तहुये और भयभीतहुए ब्रह्माकी शरण गये ॥ ७ ॥ और यह कहते भये कि हेभूतभावन ! अर्थात भू

तोंके पैदाकरने वाले-हे भूतोंकेईश्वर!बडा भय प्राप्तहुआ-हेलोकपितामह हम सब कहां जायं ॥ ८ ॥ उनके प्रति ब्रह्मा बोले कि हे देवताओ! भय मतकरो और इस महाबली भूतके संग विरोध मतकरो किन्तु-इसको अधोमुख गेरकर तुम शंकासे रहित होजावोगे ॥९॥ तिसके अनंतर क्रोधसे दुःखीहुए उन देवताओंने उस महाबली भूतको पकडकर अधोमुख गेरादिया और उसीके ऊपर वे देवता बैठगये ॥ १० ॥ वही वास्तुपुरुष समर्थ ब्रह्माने भाद्रपदके कृष्णपक्षकी तृतीयाको रचाथा ॥११॥ शनिवारके दिन और कृत्तिकाके दिन उसका जन्महुआ उसदिन

माभयङ्कुरुवोदेवाविगृह्येतमहाबलम् ॥ निपात्याधोमुखंभूमौनिर्विशङ्का भविष्यथ ॥ ९ ॥ ततस्तैः क्रोधसन्तप्तैर्गृहीत्वातम्महाबलम् ॥ विनिक्षिप्तमधोवक्रंस्थितास्तत्रैवतेसुराः ॥ १० ॥ तमेववास्तुपुरुषंब्रह्मासमसृजत्प्रभुः ॥ कृष्णपक्षेतृतीयायांमासि भाद्रपदे तथा ॥११॥ शनिवारेभवज्जन्मनक्षत्रेकृत्तिकासुच ॥ योगस्तस्यव्यतीपातः करणंविष्टिसंज्ञकम् ॥ १२ ॥ भद्रान्तरेभवज्जन्मकुलिकेतुतथैवच ॥ क्रोशमानम्महाशब्दंब्रह्माणंसमपद्यत ॥ १३ ॥ चराचरमिदंसर्वन्त्वयासृष्टं जगत्प्रभो ॥ विनापराधेनचमांपीडयन्तिसुराभृशम् ॥ १४ ॥ वरंतस्मैददौ प्रीतोब्रह्मालोकपितामहः । ग्रामेवानगरेवापिदुर्गेवापत्तनेपिवा ॥ १५ ॥ प्रासादेचप्रपायांच जलोद्यानेतथैवच ॥ यस्त्वांनपूजयेन्मर्त्योमोहाद्वास्तुनर प्रभो ॥ १६ ॥

व्यतीपात योगथा और विष्टि करणथा॥१२॥भद्राओंकेमध्यमें और कुलिक योगमें उसका जन्महुआ-और महान् शब्द करताहुआ वह वास्तुपुरुष ब्रह्माके समीपगया ॥ १३ ॥ और बोला कि हेप्रभो! यह चराचर जगत् तुमने रचाहै और बिना अपराधके ये देवता मुझे अत्यन्त पीडा देतेहैं ॥ १४ ॥ फिर प्रसन्न हुए जगत्के पितामह ब्रह्मा उसको यह वरदेते भये कि ग्रामनगर दुर्ग (किला) पत्तन (सहर) इनमें ॥ १५ ॥ और प्रासाद (महल) प्याऊ और जलोद्यान (तलाव) इनमें जो मनुष्य मोहसे वास्तुपुरुष हे प्रभो! तुझे न पूजै ॥ १६ ॥

वह दरिद्रता और मृत्युको प्राप्त होताहै और उसको पदपद (बातबात) पर विघ्न होताहै—और वास्तुपूजाको नहीं करताहुआ मनुष्य तेरा भोजन होताहै ॥ १७ ॥ यह कहकर ब्रह्मज्ञाताओंमें श्रेष्ठ ब्रह्मा शीघ्र अन्तर्धान होते भये इससे मनुष्य गृहके आरंभमें और प्रवेशमें वास्तुकी पूजाकरै ॥ १८ ॥ और द्वारके बनानेमें और तीनप्रकारके प्रवेशमें और प्रतिवर्ष यज्ञआदिमें और पुत्रके जन्ममें ॥१९॥ यज्ञोपवीत,विवाह और महोत्सवमें और जीर्णकेउद्धारमें और विशेषकर शल्यके न्यासमें अर्थात् टूटे फूटेके जोडनेमें॥२०॥ वज्र (विजली) और अग्निसे दूषितमें और भग्न (फूटा) में सर्प और चाण्डालसे युक्तमें और जिसघरमें उल्लू वसतेहों और जिस

अश्रियम्मृत्युमाप्नोतिविघ्नस्तस्यपदेपदे ॥ वास्तुपूजामकुर्वाणस्तवाहारोभविष्यति ॥ १७॥ इत्युक्त्वान्तर्दधे सद्योदेवोब्रह्मविदांवरः ॥ वास्तुपूजांप्रकुर्वीतगृहारंभेप्रवेशने ॥ १८ ॥ द्वाराभिवर्तने चैवत्रिविधेचप्रवेशने॥प्रतिवर्षश्चयज्ञादौतथापुत्रस्यजन्मनि ॥१९॥ व्रतबन्धे विवाहेचतथैवचमहोत्सवे ॥ जीर्णोद्धारेतथाशल्यन्यासेचैवविशेषतः ॥ २० ॥ वज्राग्निदूषितेभग्नेसर्पचाण्डालवेष्टिते ॥ उलूकवासि तेसततरात्रौ काकाधिवासिते ॥ २१ ॥ मृगाधिवासितेरात्रौगोमार्जाराभिनादिते ॥ वारणाश्वादिविरुतेस्त्रीणांयुद्धाभिदूषिते ॥ २२ ॥ क पोतकगृहावासेमधूनांनिलयेतथा ॥ अन्यैश्चैव महोत्पातैर्दूषितेशांतिमाचरेत् ॥ २३ ॥ अथभूमिदर्शनम् ॥ अथातः संप्रवक्ष्यामिलो कानांहितकाम्यया ॥ श्वेतारक्तातथापीताकृष्णावर्णानुपूर्व्यतः ॥ २४ ॥

घरमें ७ सातदिनतक काग वसेहों ॥ २१ ॥ और जिसमें रात्रिमें मृग वसै अथवा गौ बिलाव ये अत्यन्त शब्दकरैं-और जिसमें हाथीघो डे आदि अत्यन्त शब्दकरें और जो घर स्त्रियोंको युद्धसे अत्यन्त दूषितहो॥२२॥जिस घरमें कबूतरोंके घर हो-मधूकानिलय-अर्थात-मोहार बैठतीहो-और- इसप्रकारकेअनेक जो उत्पातहैं उनसे दूषित घरके होनेपर वास्तुशान्तिको करै ॥ २३ ॥ इसके अनन्तर भूमिके दर्शनका वर्णन करतेहैं-इसके अनन्तर जगतके कल्याणकी कामनासे भूमिको वर्णन करताहूं कि ब्राह्मण आदिवर्णोंके घरोंकी क्रमसे श्वेत-रक्त-पीत-और कृष्णवर्णकी भूमि होतीहै ॥ २४ ॥

सुन्दर जिसमें गन्ध हो ऐसी श्वेतभूमि ब्राह्मणी-और रुधिरके समान जिसमे गन्धहो ऐसी भूमि क्षत्रिणी-सहतके समान जिसमें गंध हो ऐसी भूमि-वैश्या, और मदिराके समान जिसमें गंध हो ऐसी भूमि-शूद्रा होतीहै ॥ २५ ॥ जो भूमि-मधुर हो वह ब्राह्मणी-और जो कषैली हो वह क्षत्रिया और जो अम्ल हो (खट्टी) वह वैश्या और जो तिक्त(चरपरी) होतीहै वह शूद्रा कहीहै॥२६॥जो भूमि चकोर हो जिसका हाथी के समान आकारहो और जिसका सिंह बैल घोडाकी समान रूपहो और जिसका भद्रपीठ स्थानकी भूमि त्रिशूल और शिवालिंगके तुल्य हो ॥ २७ ॥ और प्रासादकी ध्वजा और कुंभ आदि जिसमें हों ऐसी भूमि–देवताओंकोभी दुर्ल्लभ है जो भूमि त्रिकोणहो-और जिसका

सुगन्धाब्राह्मणीभूमीरक्तगन्धा तुक्षत्रिणी ॥ मधुगन्धा भवेद्वैश्यामद्यगन्धाचशूद्रिणी ॥ २५ ॥ मधुराब्राह्मणीभूमिःकषायाक्षत्रियामता॥
अम्लावैश्याभवेद्भूमिस्तिक्ताशूद्राप्रकीर्तिता ॥ २६ ॥ चतुरस्रांद्विपाकारांसिंहोक्षाश्वेभरूपिणीम् ॥ वृत्तञ्चभद्रपीठञ्चत्रिशूलंलिंगसन्नि
भम् ॥ २७ ॥ प्रासादध्वजकुम्भादिदेवानामपिदुर्ल्लभाम् ॥ त्रिकोणांशकटाकारांशूर्प्पव्यजनसन्निभाम् ॥ २८ ॥ मुरजाकारस
दृशांसर्पमण्डूकरूपिणीम् ॥ खराजगरसङ्काशाम्बकाञ्चिपिटरूपिणीम् ॥ २९ ॥ मुद्गराभांतथोलूककाकसर्प्पनिभान्तथा ॥ शूकरो
ष्ट्रजसदृशांधनुःपरशुरूपिणीम् ॥ ३० ॥ कृकलासशवाकारान्दुर्गम्याश्चविवर्जयेत् ॥ मनोरमाचयाभूमिः परीक्षेतप्रयत्नतः ॥ ३१ ॥

शकट (गाडा)के समान आकारहो-और जो सूप औ वीजनेकी तुल्यहो ॥२८॥ और जो मुरज (मृदंग) बाजेकी तुल्यहो और सांप मैंडकके तुल्य-जिसका रूपहो-और जो गर्दभ और अजगरके समानहो और बगला और चिपिटके समान जिसका रूपहो ॥ २९ ॥ और मुद्गर-उल्लू-काक-इनकी जो तुल्यहो-शूकर-उष्ट्र-बकरी-इनकी जो तुल्य हो-धनुष-परशु-(कुहाडा) इनकी समान जिसका रूपहो ॥ ३० ॥ और-कृकलाश (कँकैंटा)और. शव(मुर्दा) जिसका इनके समान रूपहो और दुःखसे गमन करने योग्यहो, इतने प्रकारकी भूमिको वर्ज दे.

जो भूमि मनोरम हो उसकी यत्नसे परीक्षा करै ॥ ३१ ॥ और दूसरी-वह भूमि दृढ होतीहै जो उत्तर और पूर्वको नीचीहो-ब्राह्मणोंके गृहकी भूमि गम्भीर और क्षत्रियोंकी ऊंची होतीहै ॥ ३२ ॥ और वैश्योंकी-भूमि-सम (न ऊंची-न नीची) कहीहै और शूद्रोंके लिये विकट भूमि-श्रेष्ठ कहीहैं-अथवा सब वर्णोंके लिये समान जो भूमि है वह श्रेष्ठ कहीहै ॥ ३३ ॥ और सफेद वर्णकी भूमि सब वर्णोंको शुभ कहीहै जिस भूमिमें कुशा और काशहों- वह ब्राह्मणोंको और जिसमें दूब हो वह क्षत्रियोंको श्रेष्ठ है ॥ ३४ ॥ जिसमें फल पुष्प-लताहों वह वैश्योंको और जिसमें तृणहों वह शूद्रोंको श्रेष्ठहै-जो भूमि. नदीके घात (कटाव) के आश्रयमेंहो और जो बडे बडे

द्वितीयादृढभूमिश्चनिम्नाचोत्तरपूर्वके ॥ गम्भीराब्राह्मणीभूमिर्नृपाणांतुङ्गमाश्रिता ॥ ३२ ॥ वैश्यानांसमभूमिश्चशूद्राणांविकटास्मृता ॥ सर्वेषाञ्चैववर्णानांसमभूमिः शुभावहा ॥ ३३ ॥ शुक्लवर्णाचसर्वेषांशुभाभूमिरुदाहृता ॥ कुशकाशयुताब्राह्मीदूर्वानृपतिवर्गगा ॥ ३४ ॥ फलपुष्पलतावैश्याशूद्राणांतृणसंयुता ॥ नदीघाताश्रितांतद्वन्महापाषाणसंयुताम् ॥ ३५ ॥ पर्वताग्रेषुसंलग्नांगर्ताविवरसंयुताम् ॥ वक्रांसूर्यनिभांतद्वल्लकुटाभांकुरूपिणीम् ॥ ३६ ॥ मुशलाभाम्महाघोरांवायुनावापिपीडिताम् ॥ वल्लभल्लकसंयुक्तांमध्येविकटरूपिणीम् ॥ ३७ ॥ श्वशृगालनिभांरूक्षांदन्तकैः परिवारिताम् ॥ चैत्यश्मशानवल्मीकधूर्तकालयवर्जिताम् ॥ ३८ ॥ चतुष्पथमहावृक्षदेवमंत्रिनिवासिताम् ॥ दूराश्रिताञ्चभूगर्तयुक्ताञ्चैवविवर्जयेत् ॥ ३९ ॥ इतिभूमिलक्षणम् ॥

पत्थरोंसे युक्तहो ॥ ३५ ॥ और जो पर्वतके अग्रभागसे मिलीहो और जिसमें गढे और छिद्रहों जो ठेढी-और सूपके समानहो. जिसकी कान्ति लकुट-(दण्ड) के समानहो और जिस भूमिका निन्दित रूपहो ॥ ३६ ॥ और जो भूमि मुसलके समान और महाघोरहो- और जो-भल्ल-भल्लूक (रीछ) से युक्तहो और जिसका मध्यमें विकट रूपहो ॥ ३७ ॥ और जो कुत्ता-गीदड़के समानहो और जो रूखी और दातोंसे युक्त हो. और चैत्य श्मशान-वामी-और जंबूकका स्थान इनसे रहित हो ॥ ३८ ॥ और चतुष्पथ (चौराहा) महावृक्ष और देव

मंत्री-(भूत आदि) इनका जिसमें निवासहो. और जो नगरसे दूरहो. और जो गढोंसे युक्तहो-ऐसी भूमिको वर्जदे ॥ ३९ ॥ इति भूमिलक्षणम्॥इसके अनन्तर फलोंका वर्णन करतेहैं-जिस भूमिमें अपने वर्णकी गंध होय और जिसका सुंदर रूपहो-वह-भूमि धन धान्य-और सुखके देनेवाली होतीहै- और इससे विपरीत हो तो फलभी विपरीत होताहै-इससे भूमिकी परीक्षा-करनी ॥ ४० ॥ जो भूमि चकोरहो-वह महान् अन्न आदिको देतीहै. जिसकी हाथीके समान कान्तिहो वह महान् धन देतीहै, जो भूमि सिंहके तुल्यहै-वह गुणवान् पुत्रोंको देतीहै जो वृष (बैल)के समानहै-वह पशुओंकी वृद्धिको देतीहै ॥ ४१ ॥ जो भूमि वृत्त-वा भद्रपीठके तुल्यहै-वह श्रेष्ठ धनके

अथफलानि ॥ स्ववर्णगन्धासुरसाधनधान्यसुखावहा ॥ व्यत्ययेव्यत्ययफला अतःकार्यम्परीक्षणम् ॥ ४० ॥ चतुरस्नामहाधन्याद्विपाभाधनदायिनी ॥ सिंहाभासगुणान्पुत्रान्वृषाभापशुवृद्धिदा ॥ ४१ ॥ वृत्तासद्वित्तदाभूमिर्भद्रपीठनिभातथा ॥ त्रिशूलरूपावीराणामुत्पत्तिर्धनसौख्यदा॥४२॥ लिङ्गाभालिङ्गिनांश्रेष्ठाप्रासादध्वजसन्निभा ॥ पदोन्नतिंप्रकुरुतेकुम्भाभाधनवर्द्धिनी ॥ ४३ ॥ त्रिकोणशकटाकाराशूर्पव्यजनसन्निभा ॥ क्रमेणसुतसौख्यार्थधर्महानिकरीस्मृता ॥ ४४ ॥

देनेवाली होतीहै और जिस भूमिका त्रिशूलके समान आकारहै उस भूमिमें शूर वीरोंकी उत्पत्ति होतीहै. और वह धन और सुख देनेवाली होतीहै ॥ ४२ ॥ और जिसकी कांति लिंगकी समान है वह संन्यासीयोंके लिये श्रेष्ठहै और जो प्रासादकी ध्वजाके तुल्यहै-वह प्रतिष्ठाकी उन्नति करतीहै और जो कुंभके समानहै वह धनके बढानेवाली होतीहै ॥ ४३ ॥ जो भूमि त्रिकोण और जिसका शकटके समान आकार हो और जो सूप, वीजनेके समानहो वह भूमि पुत्र और सुख और धर्मकी हानिको क्रमसे करतीहै ॥ ४४ ॥

जो भूमि मुरजके समानहै वह वंशका नाश करती है और जो सर्प मैंडकके समानहै वह भयकी देतीहै और खरके समान जिसका आकारहै वह धनका नाश करतीहै और जो अजगरसे युक्तहै वह मृत्युको देतीहै ॥ ४५ ॥ और जो भूमि चिपिटा वा मुद्गर के समानहै वह पुरुषोंसे हीन रहतीहै- और जो काक- उलूके तुल्यहै वह दुःख- शोक भयको देतीहै ॥ ४६ ॥ और जो सर्पके समान हो- वह पुत्र-पौत्रोंके नष्ट करनेवाली- जो वंशकी समान हो- वह वंश नष्ट करनेवाली होतीहै- और जो शूकर- ऊंट बकरी धनुः- कुहाडा- इनके समान आकारवालीहो ॥ ४७ ॥ वह कुचैल मलिन और मूर्ख तथा ब्रह्महत्यारे पुत्रोंको पैदा करतीहै. और

मुरजावंशहासर्पमण्डूकाभांभयावहा ॥ नैःस्वंखरानुकाराचमृत्युदाऽजगरान्विता ॥ ४५ ॥ चिपिटापौरुषैर्हीनामुद्गराभातथैवच ॥ काकोलूकनिभातद्वद्दुःखशोकभयप्रदा ॥ ४६ ॥ सर्पाभापुत्रपौत्रघ्नीवंशाभावंशहानिदा ॥ शूकरोष्ट्राजसदृशीधनुःपरशुरूपिणी ॥ ॥ ४७ ॥ कुचैलान्मलिनान्मूर्खान्ब्रह्मघ्नाञ्जनयेत्सुतान् ॥ कृकलासशवाकारामृतपुत्राधनार्तिदा ॥ ४८ ॥ दुर्गम्यापापिनांवंशप्रजाभूमिं परित्यजेत् ॥ मनोरमासुतप्रदादृढाधनप्रदामता॥सुतार्थदातथाप्युदक्सुरेशदिक्प्लवामही ॥ ४९ ॥ गंभीरशब्दाजनयेत्पुत्रान्गंभीरनिः स्वनान् ॥ तुङ्गापदान्वितान्कुर्यात्समासौभाग्यदायिनी ॥ ५० ॥

जो करकैटा और मुर्देकी समानहो वह पुत्रोंकी मृत्यु देनेवाली और धनके नष्ट करनेवाली और पीडाकी दाता होतीहै ॥ ४८ ॥ जिसमें दुःखसे गमन किया जाय ऐसी भूमि और पापीयोंके वंशकी प्रजाकी जो भूमि है उसै त्यागदे. मनोरम भूमि पुत्र देनेवाली और मनोरम भूमि सुखदेनेवाली और दृढ भूमि धनदेनेवाली होतीहै और उत्तर पूर्वको निम्न जो भूमि वह पुत्र और धन देने वाली होतीहै ॥ ४९ ॥ जिस भूमिका गंभीर शब्द हो वह गंभीर शब्दवाले पुत्रोंको पैदा करतीहै और ऊंची

भूमि पदवीवाले पुत्रोंको पैदा करतीहै और सम भूमि सौभाग्यको देतीहै ॥ ५० ॥ और विकट भूमि शूद्रजाति और दुर्गके निवासी और चोरोंको शुभकी दाता होतीहै अन्य मनुष्योंको नहीं ॥ ५१ ॥ और अपने वर्णकाहै रूप जिसका ऐसी भूमि वर्णोंको सुख देतीहै और वर्णोंका अधिपति करतीहै और शुक्लवर्णकी भूमि सबके पुत्रपौत्र बढानेवाली होतीहै ॥ ५२ ॥ कुश और काशवाली भूमि ब्रह्मतेजवाले पुत्रोंको पैदा करतीहै और दूबसे युक्त भूमि शूरवीरोंको जन्मातीहै और फलसे युक्त भूमि धन और पुत्रोंको देतीहै ॥ ५३ ॥ और नदीके कटावकी भूमि मूर्ख और सन्तानहीनोंको पैदा करतीहै जिस भूमिके मध्य-

विकटाशूद्रजातीनांतथादुर्गनिवासिनाम् ॥ शुभदानापरेषांचतस्कराणांशुभावहा ॥ ५१ ॥ स्ववर्णवर्णास्वान्वर्णान्वर्णानामाधिपत्यदा॥ शुक्लवर्णाचसर्वेषाम्पुत्रपौत्रविवर्द्धिनी ॥५२॥ कुशकाशान्विताब्रह्मवर्चसान्कुरुतेसुतान् ॥ दूर्वान्वितावीरजानिः फलाढ्याधनपुत्रदा ॥ ५३ ॥ नदीघाताश्रितामूर्खान्मृतवत्सांस्तथैवच ॥ दरिद्रानश्ममध्यस्थागर्तावस्यामृषायुतान् ॥ ५४ ॥ विवरापशुपुत्रार्त्तिदायिनी सौख्यहारिणी ॥ वक्रातिवक्राजनयेत्पुत्रान्विद्याविहीनकान् ॥ ५५ ॥ शूर्पमार्जारलकुटनिभाभीतिसुतार्तिदा ॥ मुशलामुशलान्पुत्राञ्जनयेद्वंशघातकान् ॥ ५६ ॥ घोराघोरप्रदावायुपीडितावायुभीतिदा ॥ वल्लभल्लकसंयुक्तापशुहानिप्रदासदा ॥ ५७ ॥

में पत्थर हों वह दरिद्रियोंको और गढेवाली भूमि झूठे पुत्रोंको पैदा करतीहै ॥ ५४ ॥ जिस भूमिमें छिद्रहों वह पशु और पुत्र इनको दुःखकी दाता और सुखके नष्ट करनेवाली होतीहै और टेढी वा अत्यंत टेढी भूमि विद्यासे हीन पुत्रोंको पैदा करतीहै ॥ ५५ ॥ सूप बिलाव लकुट इनके तुल्य भूमि भय, पुत्रोंके दुःखकी दाता होतीहै और मुसलके समान भूमि वंशके नाशक मूसलचंद पुत्रोंको पैदा करतीहै ॥ ५६ ॥ घोर भूमि भयकी दाता होतीहै और वायुसे पीडित भूमि वायुके भयको देतीहै

वल्ल और भीलोंसे युक्त भूमि सदैव पशुओंकी हानिको देतीहै ॥ ५७ ॥ विकट कुत्ते और शृगालकी समान भूमि विकट पुत्रोंको देतीहै और रूखी भूमि कठोर और कुत्सित वचनोंके वक्ता पुत्रोंको देतीहै ॥ ५८ ॥ और चैत्यकी भूमि घरके स्वामीको भय देतीहै और वमीकी भूमि विपत्ति देतीहै और धूर्तोंके स्थानके समीपकी भूमि निश्चयसे पुत्रके मरणको देतीहै ॥ ५९ ॥ चौराहेमें कीर्ति कानाश और देवमंदिरमें घर बनानेसे उद्वेग होताहै और सचिव (मंत्री) के स्थानमें धनकी हानि और गढेमें गृह बनानेसे अत्यन्त विपत्ति होतीहैं ॥ ६० ॥ और जिस भूमिमें बहुतसे गढेहों उसमें जलकी प्यास, और कच्छपके समान भूमिमें धनका

विकटाविकटान्पुत्राञ्छ्वशृगालनिभातथा॥ददातिरूक्षापरुषादुर्वचाञ्जनयेत्सुतान् ॥ ५८ ॥ गृहस्वामिभयञ्चैत्येवल्मीकेविपदःस्मृताः ॥ धूर्तालयसमीपेतुपुत्रस्यमरणन्ध्रुवम् ॥ ५९ ॥ चतुष्पथेत्वकीर्तिः स्यादुद्वेगोदेवसद्मनि ॥ अर्थहानिश्चसचिवेश्वभ्रेविपदउत्कटाः ॥ ६० ॥ गर्तायान्तुपिपासास्यात्कूर्माभेधननाशनम् ॥ अथभूमिपरीक्षा ॥ निखनेद्धस्तमात्रेणपुनस्तेनैवपूरयेत् ॥ पांशुनाधिकमध्योनाश्रेष्ठाम ध्याधमाक्रमात् ॥ ६१ ॥ जलेनापूरयेच्छ्वभ्रंशीघ्रंगत्वापदैःशतम् ॥ तथैवागम्यवीक्षेतनहीनसलिलाशुभा ॥ अरत्निमात्रेश्वभ्रेवाह्यनु लिप्तेचसर्वतः ॥ ६२ ॥ घृतमामशरावस्थंकृत्वावर्तिचतुष्टयम् ॥ ज्वालयेद्भूपरीक्षार्थंसंपूर्णसर्वदिङ्मुखम् ॥ ६३ ॥

नाश होताहै। इसके अनन्तर भूमिकी परीक्षाको कहतेहैं। हस्तमात्र भूमिको खोदकर फिर उसी मट्टीसे भरैं, यदि मिट्टी अधिक मध्यम और न्यून हो जाय तो क्रमसे श्रेष्ठ, मध्यम, अधम फल जानना ॥ ६१ ॥ अथवा हस्तमात्रके गढेको जलसे भरदे और शीघ्रसौ १०० पैंड चलकर और उसी प्रकार आनकर देखे, जल कमहो जाय यदि तो भूमि शुभ नसमझनी अथवा विलस्त भर गढेको चारों तरफ लीपकर ॥ ६२ ॥ कच्चे सर्वेमें घीकरके चारों दिशाओंको पृथ्वीकी परीक्षाके लिये चार बत्ती बाले ॥ ६३ ॥

यदि चारों बत्ती जलती रहैं तो ब्राह्मण आदि वर्णोंके क्रमसे पूर्वआदि दिशाकी भूमिको ग्रहणकरैं अथवा हलसे जोतेहुए देश में सब प्रकारके बीजोंको बोदे ॥ ६४ ॥ यदि तीन पांच सात रात्रमें बीजमें क्रमसे यह फल जानना यदि तीन रातमें बोये हुये बीजोंमें अंकुर जम आवैं तो पृथ्वी उत्तम समझनी ॥ ६५ ॥ पांच रातमें जमैं तो मध्यम और सात रातमें जमैं तो अधम समझनी अथवा उस भूमिमें तिल जौं सरसौं इनको बोवे ॥ ६६ ॥ अथवा गृहकी भूमिकी सब दिशाओंमें सब अन्न बोवे जहां वे

दीप्तापूर्वादिगृह्णीयाद्वर्णानामनुपूर्वशः ॥ हलाकृष्टेतथोदेशेसर्वबीजानिवापयेत् ॥ ६४ ॥ त्रिपञ्चसप्तरात्रेणनप्ररोहन्तितान्यपि ॥ उत्तवी जात्रिरात्रेणसाङ्कुराशोभनामही॥६५॥मध्यमापञ्चरात्रेणसप्तरात्रेणनिन्दिता ॥ तिलान्वावापयेत्तत्रयवांश्चापिचसर्षपान् ॥६६॥ अथवासर्व धान्यानिवापयेच्चसमन्ततः ॥ यत्रनैवप्ररोहंतितांप्रयत्नेनवर्जयेत् ॥ ६७ ॥ व्रीहयःशालयोमुद्गागोधूमाः सर्षपास्तिलाः ॥ यवाश्चौ षधयःसप्तसर्वबीजानिचैवहि ॥६८॥ सुवर्णताम्रपुष्पाणिश्वभ्रमध्यगतानिच ॥ यस्यनाम्निसमायान्तिसाभूमिस्तस्यशोभना ॥ ६९ ॥ पां शवोरेणुतांनीत्वानिरीक्षेदन्तरिक्षगाः ॥ अधोमध्योर्द्धगानॄणांगतितुल्यफलप्रदा ॥ ७० ॥ कृष्टांप्ररूढबीजाङ्गोध्युषितांब्राह्मणैस्तथा ॥ गत्वामहींगृहपतिःकालेसांवत्सरोदिते ॥ ७१ ॥

संपूर्ण बीज नजमे उस भूमिको यत्नसे वर्जदे॥६७॥व्रीहि शाली मूंग गेहूं सरसौं तिल जौं ये सात सर्वौषधि और सब बीज कहंतेहैं ॥६८॥ ॥ ९ ॥
सुवर्ण-तामेंके रंगके पुष्प गढेके मध्यमें रक्खे हुए जिसके नामके आ जाय वह भूमि उसके लिये उत्तम कहीहै ॥ ६९ ॥ भूमिकी धूलि की रेणुको आकाशमें फैंककर देखैं यादि वे अधो भाग मध्यभाग ऊर्द्धभागमें प्राप्त होजाय तो अधोगति मध्यगति ऊर्ध्वगति देनेवाली वह भूमि होतीहै ॥ ७० ॥ जुती हुई जिस भूमिमें बीज जमेंहों अथवा जिसमें गौ और ब्राह्मण वसेहों ऐसी भूमिमें वर्षदिनके कहे

इसके अनन्तर शकुनोंको कहतेहैं कि-गृहमें प्रवेश होनेके समय पुण्याहवाचन
हुए मुहूर्तमें घरका स्वामी गमन करै (वसे) ॥ ७१ ॥ शंख और अध्ययनका शब्द जलका घट ब्राह्मणोंका समुदाय वीणा और ढोलका शब्द पुत्र करके सहित स्त्री गुरु (माता पिता आदि) मृदंग आदि बाजोंका शब्द और भेरीका शब्द ये उत्तम शकुनहैं ॥ ७२ ॥ अच्छे शुक्ल वस्त्रोंको धारण किये हुए कन्या-अच्छी रसीली और सुगन्धित मट्टी पुष्प सुवर्ण चांदी मोती मूंगा और अच्छे उत्तम भक्ष्य पदार्थ ये गृहप्रवेशके समय कल्याणके देनेवाले हैं ॥ ७३ ॥ मांस दही दुग्ध नृयान (पालकी आदि) छत्र मीन और मनुष्योंका मिथुन (जोडा) येभी कल्याण करनेवाले हैं ॥ ७४ ॥ मृग और अंजन (सुरमा) बँधा हुआ एक पशु पगडी चन्दन दर्पण वीजना और वर्द्धमान (कवा) येभी गृहप्रवेशके समय अवस्था और आरोग्य की वृद्धि देनेवाले होतेहैं ॥ ७५ ॥ निर्मल कमलका पुष्प गीतोंके शब्द सुफेद वृष मृग ब्राह्मण ये यदि घरमें जानेके समय मनुष्यके सम्मुख हों उस मनुष्यको धन्यहै अर्थात् ये उत्तमोत्तम फलके देनेवालेहैं । तथा गृहकर्मके करनेमें हाथी घोडा और सौभाग्यवती स्त्री और श्रेष्ठ स्त्री-ये- धन पुत्र और सुख आरोग्य इनके देनेवाली होतीहैं ॥ ७६ ॥ वेश्या अंकुश दीपक माला और वर्षा ये गृहारंभके वा

अथशकुनाः ॥ पुण्याहशंखाध्ययनाम्बुकुम्भाविप्राश्ववीणापटहस्वनानि ॥ पुत्रान्वितास्त्रीगुरवोमृदङ्गवाद्यानिभेरीनिनदाः प्रशस्ताः ॥ ७२ ॥ कन्यासुधौताम्बरवासकारीमृदः सुरस्यासुरभीसुगन्धाः ॥ पुष्पाणिचामीकररौप्यमुक्ताप्रवालभक्ष्याणिशुभावहानि ॥ ७३ ॥ आमिषंदधिदुग्धंचनृयानंछत्रमेदच ॥ मीनमिथुनंपुंसामायुरारोग्यवृद्धिदम् ॥ ७५ ॥ मृगारांजनबद्धैकपशुश्चोष्णीषचन्दनम् ॥ आदर्शव्यजनंवर्द्धमानाश्चापिशुभावहाः ॥ ७४ ॥ कमलममलङ्गीतारावःसितोक्षमृगाद्विजा गमनसमयेपुंसांधन्यागृहाद्यधिवासिते ॥ तंथावृषिर्गृहारंभेनिवेशेसमभीष्टदा ॥ ७७ ॥ गजहयसुवासिन्यस्तथाप्रवराङ्गनाधनसुतसुखारोग्यायुष्प्रदागृहकर्मणि ॥ ७६ ॥ गणिकाचाङ्कुशंदीपम्मालांबालांसुभूषिताम् ॥

गृहप्रवेशके समय होय तो ये अच्छी तरह अभीष्ट फलके देनेवाले होतेहैं॥७७॥अब खोटे शकुनोंको कहतेहैं- कि- खोटी वाणी शत्रुकी वाणी मद्य चर्म हाड पूले आदि तृण तुष(उस)सांपकी चर्म अंगारा ॥७८॥कपास लवण कीच नपुंसक तेल औषध विष्ठा काले अन्न रोगी तैल आदिसे अभ्यक्त॥७९॥पतित जटाधारी उन्मत्त शिरमुंडाये हुए नंगे शिर-इन्धन-विवरा(खोटाशब्द)इनको तथा पक्षी मृग मानुष्य ॥८०॥इन के दो भेदोंको बलती हुई दग्ध तथा जिनमें धूमां उठ रहाहो उन दिशाओंमें देखता हुआ पुरुष जो गृहप्रवेश करै तो उसका मरण बुद्धिमान्

16

अथापशकुनानि॥दुर्वाणीशत्रुवाणीचमद्यञ्चर्मास्थिरेवच ॥ तृणन्तुषन्तथासर्पचर्मचाङ्गारमेवच ॥७८॥ कार्पासलवणम्पङ्कक्लीबतैलौषधा निच॥ पुरीषंकृष्णधान्यानिव्याधिताभ्यक्तमेवच ॥ ७९ ॥ पतितोजटिलोन्मत्तौमुण्डीनग्नशिरास्तथा ॥ इन्धनानिविरावश्चद्विपक्षिमृग मानुषम् ॥ ८० ॥ ज्वलिताशासुदग्धासुधूमितासुचपश्यतः ॥ मरणंनिर्दिशेत्प्राज्ञस्तत्रशल्यंविनिर्दिशेत् ॥ ८१ ॥ यस्यापशकुन न्तस्यशल्यन्तत्रभवेद्गृहे ॥ तत्रवासन्नकुर्वीतगृहञ्चैवनकारयेत् ॥ ८२ ॥ अथखननविधिः ॥ ज्योतिश्शास्त्रानुसारेणसुदिने शुभवासरे ॥ सुलग्नेसुमुहूर्तेचसुस्नातः प्राङ्मुखोगृही ॥ ८३ ॥ पूजयेद्गणनाथञ्चग्रहांश्चकलशेस्थितान् ॥ परीक्षिते चभूभागेगोमयेनानुलिप्यच ॥ ८४ ॥

मनुष्य कहै-और उस भूमिमें दुःख कहै ॥ ८१ ॥ जिस मनुष्यको अपशकुनहो उस मनुष्यको दुःख होताहै इससे उस घरमें वास न करै और न ऐसी भूमिमें घर बनावै ॥ ८२ ॥ अब खननकी विधिको कहते हैं कि, ज्योतिःशास्त्रके अनुसार शोभन दिन और शुभवार सुंदर लग्न और अच्छी मुहूर्तमें भलीप्रकार स्नान करकै गृहस्थी पुरुष पूर्वको मुख करके बैठै ॥ ८३ ॥ और फिर गणपति कलशके ऊपर स्थापन किये नवग्रह इनका पूजन कर, फिर पूर्वोक्तप्रकारसे परीक्षाकी हुई उसी पृथिवीमें किसी जगह गौके गोबरसे लीपै ॥ ८४ ॥

वहां ब्राह्मण और ज्योतिषीका पूजन करै, जितनी भूमिमें गृह बनानाहो उतनी भूमिको ॥ ८५ ॥ गृही पुरुष पंचगव्य सर्वौषधिका जल पंचामृत इनसे सींचै और फिर शुद्धिकी कामनासे भूसंस्कारोंको करै ॥८६॥ और उस जगह पूर्व सुवर्ण जिसके गर्भमें और फलोंसे युक्त समस्त धान्योंसहित तथा समस्त गंध और सर्वौषधिसहित८७पुष्पोंसे सुशोभित रक्त जिसका वर्ण वस्त्र जिसके ऊपर लिपटाहो मंत्रोंसे अभिमंत्रित ऐसे घटका प्रथम स्थापन करके उसमें नवग्रह वरुण॥८८॥ पर्वत वन कानन नदी नद कर्णिका और समुद्रोंसहित पृथिवीका आवाहनकरके॥८९॥

तत्रसंपूजयेद्विप्रान्दैवज्ञश्चतथैवच ॥ यावत्प्रमाणाभूर्ग्राह्यागृहार्थन्तावतागृही ॥ ८५ ॥ पञ्चगव्यौषधिजलैस्तथापञ्चामृतेनच ॥ सेचयेच्छुद्धिकामेनभूसंस्कारांश्चकारयेत् ॥ ८६ ॥ तत्रकुम्भंनिवेश्यादौहेमगर्भंफलैर्युतम् ॥ सर्वधान्ययुतंसर्वगन्धिसर्वौषधैर्युतम् ॥ ८७ ॥ पुष्पान्वितंरक्तवर्णंसवस्त्रंमंत्रमंत्रितम् ॥ तस्मिन्नावाहयेत्खेटान्वरुणप्रमुखांस्तथा ॥ ८८ ॥ तस्मिन्नावाहयेद्भूमिंसशैलवनकाननाम् ॥ नदीनदसमायुक्ताङ्कर्णिकाभिश्चभूषिताम् ॥ ८९ ॥ सागरैर्वेष्टितान्तंत्रपूजयेत्प्रार्थयेत्ततः ॥ दिक्पालान्कुलदेवींश्चदेवान्यक्षांस्तथोरगान् ॥ ९० ॥ बलिञ्चदत्त्वाविधिवज्जलायेतिजपेत्ततः ॥ षड्ऋचंरुद्रजापञ्चकारयेद्विधिपूर्वकम् ॥ ९१ ॥ तस्मिन्संपूजयेद्वास्तुंप्रार्थयेत्पूजयेत्ततः ॥ ॐनमोभगवतेवास्तुपुरुषायकपिलायच ॥ ९२ ॥ पृथ्वीधरायदेवायप्रधानपुरुषायच ॥ सकलगृहप्रासादपुष्करोद्यानकर्मणि ॥ ९३ ॥ गृहारंभप्रथमकालेसर्वासिद्धिप्रदायक ॥ सिद्धदेवमनुष्यैश्चपूज्यमानोदिवानिशम् ॥ ९४ ॥

पूजनकरैं दिक्पाल कुलदेवी देव यक्ष और उरग इनकी प्रार्थना और बलिको देकर जलाय इस मंत्रको जपै और षड्ऋच और रुद्री इनका विधिपूर्वक जप करै ॥९०॥९१॥ फिर उसी घटमें वास्तुकी पूजा और प्रार्थना करे और ॐनमोभगवते वास्तुपुरुषाय कापिलाय॥९२॥पृथ्वीधराय देवाय प्रधानपुरुषायच इसप्रकार कहकर नमस्कार करै और कहै कि समस्त गृह महल पुष्कर उद्यान आदिकर्म और गृहारंभके प्रथम समयमें

सब सिद्धियोंके देनेवाला और सिद्ध देवता मनुष्य ये जिसकी दिन रात सेवा करतेहैं ॥९४॥ ऐसे वास्तुपुरुष आप इस समय इस प्रजापति क्षेत्रमें आनकर स्थितहो और यहां आकर पूजाको ग्रहण करो और वरको दो ॥ ९५ ॥ हेवास्तुपुरुष! हे भूमिरूपीशय्यापर सोनेमें तत्पर हे प्रभो! आपको नमस्कार है. मेरे गृहको धन आन्य आदि करिकै समृद्ध (युक्त) सदैव करो ॥ ९६ ॥ इस प्रकार प्रार्थना करके फिर भूमिमें पिष्टी वा चांवलोंसे नागरूप धारण किये हुये समस्त वास्तुपुरुषको लिखै ॥ ९७ ॥ और वेदके मंत्रोंसे आवा

गृहस्थानेप्रजापतिक्षेत्रेऽस्मिन्स्तिष्ठसाम्प्रतम् ॥ इहागच्छइमांपूजांगृहाणवरदोभव ॥ ९५ ॥ वास्तुपुरुषनमस्तेऽस्तुभूमिशय्यारतप्रभो ॥ मद्गृहन्धनधान्यादिसमृद्धंकुरुसर्वदा ॥ ९६ ॥ इतिप्रार्थ्यततोभूमौसंलिखेद्वास्तुपूरुषम् ॥ पिष्टातकैस्तंडुलैर्वानागरूपधरंविभुम् ॥ ९७ ॥ आवाहयेद्वेदमन्त्रैः पूजयेच्चस्वशक्तितः ॥ आवाहयाम्यहंदेवंभूमिस्थंचअधोमुखम् ॥ ९८ ॥ वास्तुनाथं जगत्प्राणंपूर्वस्यांप्रथमाश्रितम् ॥ विष्णोरराटेतिमंत्रेणपूजयेत्सर्पनायकम् ॥ ९९ ॥ नमोस्तुसर्पेभ्यइतिवापूजयेच्चस्वशक्तितः ॥ कुक्षिप्रदेशेनिखनेद्वास्तुनागस्यमन्त्रतः ॥ १०० ॥ त्रिषुत्रिषुचमासेषुनभस्यादिषुचक्रमात् ॥ यद्दिङ्मुखोवास्तुनरस्तन्मुखं सदनंशुभम् ॥ १०१ ॥

हन करै और अपनी शक्तिके अनुसार पूजन करै कि भूमिके विषै स्थित और अधोमुख वास्तुका मैं आवाहन करताहूं ॥ ९८ ॥ जो वास्तुके नाथहैं जो जगत्के प्राणहैं और जो प्रथम पूर्वदिशामें स्थितहैं ऐसे सबके स्वामी वास्तुपुरुषका विष्णोरराट इस मंत्रसे पूजन करै ॥ ९९ ॥ अथवा अपनी शक्तिके अनुसार नमोस्तु सर्पेभ्यः इस मंत्रसे पूजनकरै और पूर्वोक्त मंत्रको पढकर वास्तुनागकी कुक्षिके स्थानपर खननकरै (खोदे) ॥ १०० ॥ और भाद्रपद आदि तीन तीन मासोंमें क्रमसे पूर्व आदि दिशामें वास्तुपुरुषका मुख होताहै

जिसादिशाको वास्तुपुरुषका मुखहो उसीमें गृहका मुख शुभ होताहै ॥ १०१ ॥ अन्यदिशाको है मुख जिसका ऐसा घर दुःखशोक भयका देनेवाला होताहै और वृषकी संक्रान्तिसे तीन तीन संक्रांतियोंमें वेदीके विषै और सिंहकी संक्रांतिसे तीन २ संक्रांतियोंमें गृहके विषै॥१०२॥और मीनकी संक्रातिसे तीन२ सक्रांतियोंमें देवमंदिरके विषै और मकरकी संक्रांतिसे तीन २ संक्रातियोंमें तडागके विषै गिने तो पूर्व आदि दिशाओंमें शिरकरके वास्तुनाग तीन २ संक्रांतियोंमें सोतेहैं ॥ १०३ ॥ भाद्रपद आदि तीन २ महीनोंमें वास्तु पुरुषके वामपार्श्वके क्रोड (भाग) में घरका बनाना शुभहोताहै और पूर्वोक्त क्रमसे ईशानदिशासे कालसर्प चलताहै ॥ १०४ ॥

अन्यादिङ्मुखगेहन्तुदुःखशोकभयप्रदम् ॥ वृषार्कादित्रिकंवेद्यांसिंहादिगणयेद्गृहे ॥ १०२ ॥ देवालयेचमीनादितडागेमकरादिकम् ॥
पूर्वादिषुशिरः कृत्वानागश्शेतेत्रिभिस्त्रिभिः ॥ १०३ ॥ भाद्राद्यैर्वामपार्श्वेचतस्यक्रोडेगृहंशुभम् ॥ ईशानतः कालसर्पसंहारेणप्रसर्पति
॥१०४॥विदिक्षुशेषवास्तोश्चमुखन्त्याज्यश्चतुर्थकम्॥खनेच्चसौरमानेनव्यत्ययश्चाशुभंभवेत् ॥ १०५॥ चतुस्त्रिकादिशाला
नामेषदोषोनविद्यते॥एकंनागोडुसंशुद्ध्यामंदिरारम्भणंशुभम् ॥ १०६॥ अधोमुखेचनक्षत्रेशुभेह्निशुभवासरे॥चन्द्रतारानु
कूल्येचखननारम्भणंशुभम्॥१०७॥त्रिषुत्रिषुचमासेषुमार्गशीर्षादिषुक्रमात्॥पूर्वदक्षिणतोयेशपौलस्त्याशांक्रमादगुः१०८

ई	वायु	नैं०	अग्नि
भा	मा	फा	ज्ये
कु	पौ	चै	आ
का	मा	वै	श्रा

ईशान आदिविदिशाके मध्यमें वास्तुपुरुषका मुख जो चौथी विदिशामें है वह त्यागने योग्यहै और संक्रांतिके प्रमाणसे सौरमानकर खनन (खोदै) करै और विपरीत रीतिसे करै तो अशुभ होताहै ॥ १०५ ॥ जो घर चौथे वा तीसरे बनाया जाय उसमें यह दोष नहीं वास्तुनाग और नक्षत्रकी भली प्रकार शुद्धिसे एकवार मंदिरका आरंभ करना शुभ होताहै ॥ १०६ ॥ अधोमुख नक्षत्र शुभदिन और शुभवासरमें और चंद्रमा और तारागण इनकी अनुकूलतामें खनन करना शुभहोताहै ॥ १०७ ॥ और मार्गशिरसे

लेकर तीनतीन मासोंमें पूर्व दक्षिण पश्चिम और उत्तर दिशाओंमें क्रमसे राहु रहताहै ॥ १०८ ॥ राहुकी दिशामें स्तंभके रखनेसे वंशका नाश और द्वार चढानेसे वह्निका भय और गमन करनेमें कार्यकी हानि और गृहके आरंभमें कुलका क्षय होताहै ॥ १०९ ॥ सूर्यवारसे लेकर क्रमसे नैर्ऋति उत्तर अग्नि पश्चिम ईशान दक्षिण वायव्य इन दिशाओंमें राहु वसताहै इन दिशाओंके चक्रमें मुखके विषे गमन और घरका बनाना उत्तमहै ॥ ११० ॥ राहुके शिरके स्थानमें खनन करै तौ आत्माका नाश और पृष्ठभागमें खनन करनेसे माता

स्तंभेवंशविनाशःस्याद्द्वारे वह्निभयंभवेत् ॥ गमनेकार्यहानिःस्याद्गृहारम्भेकुलक्षयः ॥ १०९ ॥ रक्षःकुवेराग्निजलेशया म्यवायव्यकाष्ठासुचसूर्य्यवारात् ॥ वसेदगुश्चाष्टसुदिग्भचक्रेमुखेविवर्ज्योगमनंगृहंच ॥ ११० ॥ शिरःखनेविनाशः स्यान्माता पित्रोश्चपृष्ठके ॥ स्त्रीपुत्रनाशः पुच्छेतुगात्रेपुत्रविनाशनम् ॥ १११ ॥ कुक्षौसर्वसमृद्धिः स्याद्धनधान्यसुतागमः ॥ सिंहादिषुचमासे षुआग्नेय्यांकुक्षिमाश्रितः ॥ ११२ ॥ वृश्चिकादिषुईशान्यांकुम्भादिषुचवायुदिक्‌ ॥ वृषादिषुचनैर्ऋत्यमुखंपुच्छंनशोभनम् ॥ ११३ ॥ कृत्तिकाद्यंसप्तपूर्वेमघाद्यंसप्तदक्षिणे ॥ मैत्राद्यंपश्चिमे सप्तधनिष्ठाद्यन्तथोत्तरे ॥ ११४ ॥

पिताका नाश और पुच्छमें खनन करनेसे स्त्रीपुत्रका नाश, राहुगात्रमें खनन करनेसे पुत्रका नाश होताहै ॥ १११ ॥ कुक्षिमें खनन करने से संपूर्ण ऋद्धि बढतीहै और धन पुत्रोंका आगमन होताहै सिंह आदि मासोंके विषै अग्निकोणमें रहताहै ॥ ११२ ॥ और वृश्चिक आदि मासोंमें ईशानमें और कुंभ आदि मासोंमें वायुकोणमें और वृषआदि मासोंमें नैर्ऋति कोणमें राहुका मुख होताहै और राहुको पुच्छ शोभन नहीं होती ॥ ११३ ॥ कृत्तिकाआदि सात नक्षत्र पूर्वमें, मघा आदि सात नक्षत्र दक्षिणमें, अनुराधा आदि सात नक्षत्र पश्चि

ममें धनिष्ठा आदि सात नक्षत्र उत्तरमें रहतेहैं ॥ ११४ ॥ चंद्रमा अग्रभागमें होय तो स्वामीको भय होताहै और पीठपर चंद्रमा होय तो कर्मका कर्ता नष्ट होताहै दक्षिणमें होय तो धनको देतेहैं वामभागमें चंद्रमा होय तो स्त्री और सुखसंपदाओंको देताहै ॥ ११५ ॥ गृहमें मिले हुए नक्षत्रोंमें जिन नक्षत्रोंमें चंद्रमा होय उन सातों नक्षत्रोंमें शलाका कृत्तिका आदि नक्षत्रोंके क्रमसे रक्खै ॥ ११६ ॥ चंद्रमा और वास्तुका नक्षत्र अग्र और पृष्ठभागमें श्रेष्ठ नहीं होता लग्न और नक्षत्रसे विचारा हुआ यह चंद्रमा शीघ्र फलको देताहै ॥ ११७ ॥ गृहका चंद्रमा पीठपर हो वा सन्मुख होयतो शुभ नहीं होता वाम और दक्षिण भागका चंद्रमा वास्तुकर्ममें श्रेष्ठ होताहै ॥ ११८ ॥

अग्रेचन्द्रेस्वामिभयङ्कर्मकर्ताचपृष्ठके ॥ दक्षिणेचधनन्दद्युर्वामेस्त्रीसुखसंपदः ॥ ११५ ॥ गृहोपलब्धऋक्षेषुयत्रऋक्षेषुचन्द्रमाः ॥ शलाकासप्तकेदेयंकृत्तिकादिक्रमेणच ॥ ११६ ॥ ऋक्षश्चन्द्रस्यवास्तोश्चअग्रेपृष्टेनशस्यते ॥ लग्नाहक्षाद्विचार्य्योसौचन्द्रः सद्यः फलप्रदः ॥ ११७ ॥ गृहचन्द्रेसम्मुखस्थेपृष्ठस्थेनशुभंगृहम् ॥ वामदक्षिणगश्चन्द्रः प्रशस्तोवास्तुकर्मणि ॥ ११८ ॥ लोहदण्डं चसम्पूज्यभैरवञ्चतथैवच ॥ तद्दिक्पालन्नमस्कृत्यपृथिवीञ्चतथैवच ॥ ११९ ॥ शिवोनामेतिमन्त्रेणलोहदण्डंप्रपूजयेत् ॥ निवर्त यामीत्यृचावैध्यायेदीशमुमापतिम् ॥ १२० ॥ बलेनलोहदण्डेननिखनेद्वास्तुपूरुषम् ॥ यावत्प्रमाणांभुवमेतितावत्तस्यस्थितिर्भवे त् ॥ १२१ ॥ तंलोहदण्डंवस्त्राक्तंब्राह्मणायनिवेदयेत् ॥ पुत्राद्यंविषमेङ्गुल्येसमेङ्गुल्ये तुकन्यकाम् ॥ १२२ ॥

लोहदण्ड (फावला) और भैरव इनको भली प्रकार पूजकर और दशों दिग्पाल और भूमिको नमस्कार करिकै ॥ ११९ ॥ शिवोनामा० इस मंत्रसे लोहदण्डका भली प्रकार पूजन करै और निर्वर्तयामि० इस मंत्रसे पार्वतीके पति महादेवका भलीप्रकार ध्यान करै ॥ १२० ॥ और लोहके दण्डको लेकर जोरसे वास्तुपुरुषका खनन करै वह लोहका दण्ड जितना अधिक भूमिमें प्रविष्टहो जाय उतने कालतक उस गृहकी स्थिति होतीहै ॥ १२१ ॥ वस्त्रसे ढकेहुए उस लोहदण्डको ब्राह्मणके प्रति निवेदन करै यदि लोहदण्डकी विषम अंगुलिहों

तो पुत्रोंको देताहै और सम अंगुलिहों तो कन्याओंको देताहै ॥ १२२ ॥ और जिस लोहदण्डकी न सम अंगुलिहों नविषमहों वह दुःख दायी होताहै उस वास्तुपुरुषके खननसमयमें शुभ वाणी और मंगल और सुन्दर वस्तुका दर्शन ॥ १२३ ॥ और वेद और गीतकी ध्वनि और पुष्पफलका लाभ वेणु वीणा मृदंग इनका सुनना और देखना शुभ होताहै ॥ १२४ ॥ दही दूध कुशा इन द्रव्योंका दर्शन कल्याणकारी होताहै और सुवर्ण चांदी तामा शंख मोती मूंगा ॥ १२५ ॥ मणि रत्न बैडूर्य स्फटिक सुखकी दाता मट्टी और गरुडका

निर्दिशेत्तुतयोर्मध्येलोहखण्डार्त्तिदन्तथा ॥ तस्मिन्कालेशुभांवाणीम्मङ्गल्यंचारुदर्शनम् ॥ १२३ ॥ वेदगीतध्वनिंपुष्पफलला भन्तथैवच ॥ वेणुवीणामृदङ्गानांश्रवणंदर्शनंशुभम् ॥ १२४ ॥ दधिदूर्वाङ्कुशाश्चेतिकल्याणंद्रव्यदर्शनम् ॥ सुवर्णरजतन्ताम्रं शंखमौक्तिकविद्रुमान् ॥ १२५ ॥ मणयोरत्नवैडूर्य्यस्फाटिकंसुखदामृदः ॥ गारुडञ्चफलंपुष्पंमृन्मयंगुल्ममेवच ॥ १२६ ॥ खाद्या निकन्दमूलानिसाभूमिः सुखदायिनी ॥ कण्टकञ्चतथासर्पखर्जूरंदर्दुमेवच ॥ १२७ ॥ वृश्चिकाश्मकवज्रञ्चविवरंलोहमुद्गरम् ॥ केशा ङ्गारकभस्मञ्चचर्मास्थिलवणन्तथा ॥ १२८ ॥ रुधिरञ्चतथामज्जारसाक्तातानशोभनाः ॥ ॥ इतिवास्तुशास्त्रेभूम्यादिपरीक्षालक्षण वर्णनंनाम प्रथमोऽध्यायः ॥ १ ॥

फल पुष्प और मिट्टीका गुल्म (गुच्छा) ॥ १२६ ॥ और भक्षण करनेयोग्य कंदमूल इनका दर्शन होयतो वह भूमि सुख देनेवाली होती है और कंटक सांप खजूर दर्दु ॥१२७॥ विच्छु पत्थर वज्र छिद्र लोहका मुद्गर केश अंगार भस्म चर्म अस्थि लवण ॥१२८॥ और रुधिर मज्जा इनका दर्शन होय तो और जो भूमि रससे युक्त होय इतनी भूमि श्रेष्ठ नही होती ॥ ॥ इति वास्तुशास्त्रे भूम्यादिपरीक्षालक्षणे पण्डित मिहिरचन्द्रकृतभाषाविवृतिसहिते प्रथमोऽध्यायः ॥ १ ॥

इसके अनंतर स्वप्नआदिकी विधिको कहतेहैं गणेश लोकपाल विशेषकर पृथिवी और ग्रह इनका कलशके ऊपर मंत्रशास्त्रके अनुसार पूजनकरके ॥ १२९ ॥ सामर्थ्यके अनुसार सामग्रीयोंका संचय करिके शुद्ध देशमें कुशासनपर बैठे और भूमिमें शुद्ध वस्त्रके ऊपर शिरके स्थानमें लक्ष्मीका पूजन भली प्रकार करै ॥ १३० ॥ और पद्मा भद्रकाली इनको बली देकर और सर्व बीज सर्व रत्न और सर्वौषधियोंसे युक्त ऐसे घटोंको ॥ १३१ ॥ अपने दोनों तटोंमें रक्खे जो रमणीक नवे और शुद्ध जलसे युक्तहों और पुष्पोंका संचय करिकै और स्वस्ति

अथस्वप्नविधिः ॥ गणेशंलोकपालांश्चपृथिवींचविशेषतः ॥ ग्रहांश्चकलशेपूज्ययथामन्त्रंयथोदितम् ॥ १२९ ॥ यथाकल्पमुपस्कृत्यशुचौदेशेकुशासनः ॥ भूमौशुद्धेनवस्त्रेणशीर्षेसंपूजयेच्छ्रियम् ॥ १३० ॥ पद्माश्चभद्रकालीश्चबलिन्दत्त्वातथैवच ॥ सर्वबीजान्वितान्कुंभान्सर्वरत्नौषधैर्युतान् ॥ १३१ ॥ कृत्वोभयतटेरम्यान्नवाञ्छुद्धोदकान्वितान् ॥ कल्पयित्वासुमनसः कृत्वास्वस्त्ययनादिकम् ॥ १३२ ॥ सावधानःशुचिः सूक्ष्मक्षौमवासाजितेन्द्रियः ॥ प्राङ्मुखोरुद्ररुद्रेतिहृदिरुद्रविधिंजपेत् ॥ १३३ ॥ षडृचंरुद्रजापञ्चकारयेत्प्रयतः शुचिः ॥ १३४ ॥ प्रकारांतरम् ॥ दुकूलमुक्तामणिभृन्नरेन्द्रः समंत्रिदैवज्ञपुरोहितोंतः ॥ स्वदेवतागारमनुप्रविश्यनिवेशयेत्तत्रदिगीश्वरार्चाम् ॥ १३५ ॥ अभ्यर्च्यमन्त्रैस्तुपुरोहितस्तामतश्चतस्यांभुविसंस्कृतायाम् ॥ दर्भैश्चकृत्वान्तरमक्षतैस्तान्किरेत्समन्तात्सितसर्षपांश्च ॥ १३६ ॥

वाचनको करिकै ॥१३२॥ सावधान और शुद्ध और सूक्ष्म रेशमके वस्त्रोंको धारण किये जितेन्द्रिय हुआ पुरुष पूर्वाभिमुख होकर रुद्र रुद्र इस प्रकार कहकर हृदयमें रुद्रविधिको जपै ॥ १३३ ॥ और छः ऋचाहैं जिसमें ऐसे रुद्रजपको सावधान होकर करावे ॥ १३४ ॥ और दूसरा प्रकार यह है कि दुकूल मोती इनको धारण करके मंत्री ज्योतिषी पुरोहित सहित राजा अपने देवताके मन्दिरमें प्रवेश करिके वहां दिशाओंके ईश्वरोंकी पूजाका स्थापन करे ॥ १३५ ॥ और पुरोहित मंत्रोंसे उस पूजाको करिके उस संस्कृत भूमिमें कुशाओंके

24

मध्यमें किये हुए अक्षत और सफेत सरसोंको बखेरैं ॥ १३६ ॥ ब्राह्मी दूब नागयूथी इनको भी बखेरै फिर राजा तकीया लगाकर पुष्प फलोंसहित पूर्ण घटोंको क्रमसे चारौं दिशाओंको रखकर शयन करै ॥ १३७ ॥ और यज्जाग्रतो दैवमुदेतिदूरम्० इत्यादि मंत्रोंको सावधानीसे पढता हुआ और एकवार लघु भोजन करता और दक्षिणपार्श्वसे सोता हुआ राजा गुरुकी आज्ञाके अनुसार स्वप्नकी परीक्षाकरै ॥ १३८ ॥ हे शंभो त्रिनेत्र रुद्र वरके दाता वामन विरूप स्वप्नके अधि

ब्राह्मींसदूर्वामथनागयूथिङ्कृत्वोपधानंशिरसिक्षितीशः ॥ पूर्णान्घटान्पुष्पफलान्वितांस्तानाशासुकुर्य्याच्चतुरः क्रमेण ॥ १३७ ॥
यज्जाग्रतोदूरमुदैतिदैवमावर्त्यमन्त्रान्प्रयतस्तथैतान् ॥ लघ्वेकभुग्दक्षिणपार्श्वशायीस्वप्नंपरीक्षेतयथोपदेशम् ॥ १३८ ॥ नमः शम्भो
त्रिनेत्रायरुद्रायवरदायच ॥ वामनायविरूपायस्वप्नाधिपतयेनमः ॥ १३९ ॥ भगवन्देवदेवेशशूलभृद्वृषवाहन ॥ इष्टानिमेसमाच
क्ष्वस्वप्नेसुप्तस्यशाश्वतम् ॥ १४० ॥ एकवस्त्रः कुशास्तीर्णेसुप्तः प्रयतमानसः ॥ निशान्तेपश्यतिस्वप्नंशुभंवायदिवाशुभम् ॥ १४१ ॥
चतुरस्रांसमांशुद्धांभूमिङ्कृत्वाप्रयत्नतः ॥ तस्मिन्दिक्साधनङ्कार्यंवृत्तमध्यगतेदिशि ॥ १४२ ॥ पूर्वप्लवेभवेल्लक्ष्मीराग्नेय्यांशोकमा
दिशेत् ॥ याम्यांयातियमद्वारंनैर्ऋतेचमहाभयम् ॥ १४३ ॥

पति जो आपहै उनको नमस्कारहै ॥ १३९ ॥ हे भगवन् हेदेवदेवेश हेशूलधारी हे वृषवाहन सोतेहुए मुझे सदैव वांछित फल-को दो ॥ १४० ॥ एक वस्त्र धारण किये कुशाके आसनपर सावधान मनसे सोता हुआ राजा रात्रिके अन्तमें शुभ वा अशुभ स्वप्नको देखताहै ॥ १४१ ॥ चकोर समान शुद्ध भूमिको यत्नसे इकसार करके उसमें वृत्तके मध्यकी दिशामें दिशाका साधन करै ॥ १४२ ॥ पूर्वकी तरफ भूमिका निचान होय तो लक्ष्मी, अग्निकोणमें होय तो शोक, दक्षिणदिशामें होय तो मरण, नै-

र्ऋत दिशामें होय तो महाभय ॥ १४३ ॥ पश्चिममें होय तो कलह, वायव्य दिशामें होय तो मृत्युको, उत्तरको होय तो वंशकी वृद्धि, ईशानमें होय तो रत्नोंके संचयको कहै ॥ १४४ ॥ और जिस भूमिकी निचाई दिङ्मूढ हो अर्थात् किसी दिशाको नहो-यतो कुलका नाश और जो टेढी होय तो दरिद्रताको कहै अब समयकी शुद्धिको वर्णन करते हैं जो मनुष्य चैत्रमें नवीन गृहको बनवाताहै वह व्याधिको प्राप्त होताहै वैशाखमें धन और रत्नोंको और ज्येष्ठमें मृत्युको प्राप्त होताहै ॥ १४५ ॥ आषाढमें भृत्य और रत्नोंको और पशुओंके नाशको प्राप्त होताहै श्रावणमें मित्रके लाभको और भाद्रपदमें हानिको प्राप्त

पश्चिमेकलहङ्कुर्य्याद्वायव्याम्मृत्युमादिशेत् ॥ उत्तरेवंशवृद्धिः स्यादीशानेरत्नसञ्चयः ॥ १४४ ॥ दिङ्मूढेकुलनाशः स्याद्वक्रेदारिद्र्यमादिशेत् ॥ अथसमयशुद्धिः ॥ चैत्रेव्याधिमवाप्नोतियोनवङ्कारयेद्गृहम् ॥ वैशाखेधनरत्नानिज्येष्ठेमृत्युस्तथैवच ॥ १४५ ॥ आषाढेभृत्यरत्नानिपशुवर्जमवाप्नुयात् ॥ श्रावणेमित्रलाभन्तुहानिंभाद्रपदेतथा ॥ १४६ ॥ युद्धंचैवाश्विनेमासिकार्तिकेधनधान्यकम् ॥ धनवृद्धिर्मार्गशीर्षेपौषेतस्करतोभयम् ॥ १४७ ॥ माघेत्वग्निभयम्विन्द्याल्लक्ष्मीर्वृद्धिश्चफाल्गुने ॥ गृहसंस्थापनंसूर्य्येमेषस्थेशुभदंभवेत् ॥ १४८ ॥ वृषस्थेधनवृद्धिः स्यान्मिथुनेमरणंभवेत् ॥ कर्कटेशुभदंप्रोक्तंसिंहेभृत्यविवर्द्धनम् ॥ १४९ ॥ कन्यारोगन्तुलासौख्यंवृश्चिकेधनधान्यकम् ॥ कार्मुकेचमहाहानिर्मकरेस्याद्धनागमः ॥ १५० ॥

होताहै ॥ १४६ ॥ आश्विनमासमें युद्धको कार्तिकमें धन धान्यको मार्गशिरमें धनकी वृद्धि पौषमासमें चौरसे भयको प्राप्त होताहै ॥ १४७ ॥ माघ मासमें अग्निका भय फाल्गुन मासमें लक्ष्मी और वंशकी वृद्धिको प्राप्त होताहै मेषके सूर्यमें गृह-का स्थापन होय तो शुभदायी होता है ॥ १४८ ॥ वृषके सूर्यमें धनकी वृद्धि मिथुनके सूर्यमें मरण कर्कके सूर्यमें गृह सुख का दाता सिंहके सूर्यमें भृत्योंकी विशेषकर वृद्धि होतीहै ॥ १४९ ॥ कन्यामें रोग तुलमें सुख वृश्चिकमें धनधान्य धनुषमें

महाहानि मकरमें धनका आगम होताहै ॥ १५० ॥ कुंभमें रत्नोंका लाभ और मीनमें गृहका आरंभ करै तौ भयानक स्वप्न होतेहैं और धन मीन मिथुन कन्याके सूर्य ये मास दोषके दाता कहेहैं ॥ १५१ ॥ ज्येष्ठ कार्तिक माघ और सिंह ये संक्रांतिके मानसे शोभन कहेहैं और फाल्गुन माघ वैशाख और श्रावण और आश्विन ॥ १५२ ॥ और कार्तिकमें गृहका बनाना पुत्र पौत्र और धनको देताहै और निषिद्धकालोंमें भी अपने अनुकूल शुभ दिनमें ॥ १५३ ॥ तृण काष्ठ गृहके आरंभमें मासका दोष नहीं

कंभेतुरत्नलाभःस्यान्मीनेस्वप्नंभयावहम् ॥ चापमीननृयुक्कन्यामासा दोषावहाः स्मृताः ॥ १५१ ॥ ज्येष्ठोर्जमाघसिंहाख्याः सौरमानेतुशोभनाः ॥ मासेतपस्येतपसिमाधवेनभसित्विषे ॥ १५२ ॥ ऊर्जेचगृहनिर्माणंपुत्रपौत्रधनप्रदम् ॥ निषिद्धेष्वपिकाले षुस्वानुकूलेशुभेदिने ॥ १५३ ॥ तृणदारुगृहारंभेमासदोषोनविद्यते ॥ पाषाणेष्टयादिगेहानिनिन्द्यमासेनकारयेत् ॥ १५४ ॥ निन्द्यमासेपिचन्द्रस्यमासेनशुभदंगृहम् ॥ गोचराष्टकवर्गाभ्यांवामवेधंविचिन्तयेत् ॥ १५५ ॥ दशान्तरदशादीनांविचारश्चात्र कर्मणि ॥ गुरुशुक्रवलेविप्रान्सूर्यभूमिजयोस्तथा ॥ १५६ ॥ शशिसौम्यवलेसौरेवर्णानुक्रमपूर्वशः ॥ गृहारंभंप्रकुर्वीतवर्ण नाथवलेसति ॥ १५७ ॥

कहाहै और पाथर ईट आदिके घरोंको निन्दित मासमें नकरावै ॥ १५४ ॥ और निंदित मासमें भी चंद्रमाके माससे गृह शुभदायी होताहै और गृहगोचर और अष्टकवर्गोंसे वामवेधकी विशेषकर चिन्ता करै ॥ १५५ ॥ और इस गृहारम्भकर्ममें भी दशा और अन्तर्दशाकी विशेषकर चिन्ताकरै और गुरु और शुक्रके बलमें ब्राह्मण सूर्य मंगलके बलमें क्षत्रिय ॥ १५६ ॥ सोम और बुधके बलमें वैश्य और शनैश्चरके बलमें [illegible] होनेपर गृहका आरंभ करै ॥ १५७ ॥

और सूर्य चंद्रमाका बल सब वर्णोंको कहाहै विषम राशिका सूर्य होय तो स्वामीको और चंद्रमाका बल होय तो स्त्रीको पीडा होतीहै ॥ १५८ ॥ और विषमराशिके शुक्रसे लक्ष्मीका नाश और जीव (बृहस्पति) से सुखकी संपदाओंका नाश बुधसे पुत्रपौत्रोंका नाश मंगलसे भाई बांधवोंको पीडा होतीहै ॥ १५९ ॥ और शनैश्चरसे दासवर्गोंको पीडा होतीहै इसमें संशय नही और विशेषकर सूर्यके बलमें बुद्धिमानोंने गृहका आरंभ कहाहै ॥१६०॥ सब वर्णोंको सूर्यकी शुद्धि कहीहै दशाका स्वामी और वर्णका स्वामी बलहीन होय ॥ १६१ ॥ और पीडित नक्षत्रपर सूर्य होय तो कदाचित् गृहका आरंभ न करै. जन्मके सूर्यमें उदरका रोग, दूसरेमें अर्थका नाश ॥१६२॥ तीसरेमें धनका लाभ, चौ

सर्वेषामपिवर्णानांसूर्यचंद्रबलंस्मृतम् ॥ विषमस्थेरवौस्वामीपीड्यतेगृहिणीविधौ ॥ १५८ ॥ शुक्रेणपीड्यतेलक्ष्मीर्जीवेनसुखसंपदः ॥ बुधेनपुत्रपौत्राश्चभौमेनभ्रातृबान्धवाः ॥ १५९ ॥ सौरेणदासवर्गाश्चपीड्यंतेनात्रसंशयः ॥ विशेषेणतुसूर्यस्यबलेप्रोक्तंगृहंबुधः ॥ १६० ॥ सर्वेषामपिवर्णानांरविशुद्धिर्विधीयते ॥ दशापतौहीनबलेवर्णनाथेतथैवच ॥ १६१ ॥ पीडितर्क्षगतेसूर्य्येन विदध्यात्कदाचन ॥ प्रथमेकोष्ठरोगंचद्वितीयेचार्थनाशनम् ॥ १६२ ॥ तृतीयेधनलाभंचचतुर्थेभयदोरविः ॥ पञ्चमेपुत्रनाशाय शत्रुनाशायशत्रुगे ॥ १६३ ॥ स्त्रीकष्टंसप्तमेसूर्येमृत्युश्चाष्टमगेहगे ॥ नवमेधर्मनाशायदशमेकर्मसंयुतिः ॥ १६४ ॥ एकादशेभवेल्लक्ष्मीर्द्वादशेचधनक्षयः ॥ पुत्रेद्वितीयेद्यूनेचधर्मेमध्यबलोरविः ॥ १६५ ॥ द्वितीयपुत्राङ्कगतोविश्वाहात्परतः शुभः ॥ अस्तगानीचराशिस्थाः परराशौपरैर्जिताः ॥ १६६ ॥ वृद्धस्थाबालभावस्थावक्रगाश्चातिचारगाः ॥ रिपुदृष्टिवशंयाताउल्कापातेनदूषिताः ॥१६७॥

थेमें भयका दाता होताहै पांचमेंमें पुत्रका नाश छठेमें शत्रुका नाश ॥१६३॥ सातमेंमें स्त्रीको कष्ट आठमेंमें मृत्यु, नवमेंमें धर्मका नाश दशमेंमें कर्मका योग होताहै ॥१६४॥ ग्यारमेंमें लक्ष्मी होतीहै और बारमेंमें धनका नाश होताहै पांचमें दूसरे द्यून (सातवें) और नौमें सूर्य होय तो मध्यबली होताहै ॥ १६५ ॥ दूसरे पांचमे नवमे स्थानका सूर्य त्रयोदश १३ दिनसे परै शुभ कहाहै अस्त हुये और नीच राशिके और परराशिके और अन्य गृहोंके जीतेहुए ॥ १६६ ॥ और वृद्धअवस्था और बालअवस्थामें स्थितहुए वक्री और अतिचारी औ

र शत्रुकी दृष्टिके वशमें प्राप्त हुए और उलकाके पातसे दूषित जो गृह हैं ॥ १६७ ॥ वे गृहके आरंभमें फल नहीं देते इससे उनका गृहके आरंभमें भली प्रकार पूजन करै स्वामीके हस्तप्रमाण वा ज्येष्ठी पत्नीके हाथसे ॥ १६८ ॥ और ज्येठे पुत्रके हाथसे वा कर्मकारके हाथसे अनामिकापर्यन्त हाथ होताहै और वह ऊपरको उठाये हुये मनुष्यका पांचमां भाग होताहै ॥ १६९ ॥ कनिष्ठिका वा मध्यमाके प्रमाणसै घरको बनवावै स्वामीके हस्तप्रमाण वा पत्नीके हस्तप्रमाणसे ॥ १७० ॥ मनुष्योंका घर पुरातन आचार्योंने

नफलन्तिग्रहागेहप्रारंभेतान्प्रपूजयेत् ॥ स्वामिहस्तप्रमाणेनज्येष्ठपत्नीकरेणच ॥ १६८ ॥ ज्येष्ठपुत्रकरेणापिकर्मकारकरेणच ॥ अनामिकान्तंहस्तः स्यादूर्द्ध्वबाहोःशरांशकः ॥ १६९ ॥ कनिष्ठिकामध्यमावाप्रमाणेनैवकारयेत् ॥ स्वामिहस्तप्रमाणेनज्येष्ठपत्नीकरेणच ॥ १७० ॥ गर्भमात्रंभवेद्गेहंनृणांप्रोक्तंपुरातनैः ॥ स्वामिहस्तप्रमाणेनगृहंकुर्य्यादतन्द्रितः ॥ १७१ ॥ हस्तादिरेणुपर्य्यन्तमयुग्मंयुग्ममेवच ॥ कृष्णपक्षेतिथिंषष्ठींगण्डान्तेरविसंक्रमे ॥ १७२ ॥ रविभौमदिनेविष्टयांव्यतीपातेचवैधृतौ ॥ मासदग्धंवारदग्धंतिथिंषष्ठींविवर्जयेत् ॥ १७३ ॥ अनुक्तेष्वेवधिष्ण्येषुनकर्त्तव्यंकदाचन ॥ क्रकचन्तिथिदग्धञ्चयोगानांवज्रसंज्ञकम् ॥ १७४ ॥ उत्पातैर्दूषितंमृक्षन्निसर्गन्दर्शसंज्ञकम् ॥ वज्रव्याघातशूलेषुव्यतीपातातिगण्डयोः ॥ १७५ ॥

गर्भमात्र कहाहै और स्वामीके हस्तप्रमाणसे सावधानीसे गृहको करै ॥ १७१ ॥ और हस्तसे लेकर रेणुपर्यंत अयुग्म वा युग्म गृहका प्रमाण होताहै. कृष्णपक्षकी षष्ठीतिथिको गण्डान्त और सूर्यके संगममें ॥ १७२ ॥ रविवार और भौम भद्रा व्यतीपात वैधृतिमें मासदग्ध वारदग्ध नक्षत्रको और षष्ठीतिथिको विशेषकर वर्जदे ॥ १७३ ॥ और शास्त्रमें नहीं कहे हुये नक्षत्रोंमें कदाचित् गृहको न करै क्रकचयोग दग्धातिथि वज्रयोग ॥ १७४ ॥ उत्पातोंसे दूषित नक्षत्र अमावास्या वज्र व्याघात शूल व्यतीपात अतिगंड ॥ १७५ ॥

विष्कंभ गंड परिघ इनसे वर्जित योगोंमें गृहका आरंभ कहाहै. स्वाती अनुराधा ज्येष्ठा गान्धर्व (धनिष्ठा) भग (पूर्वाफा०) रोहिणी॥१७६॥
इनमें स्तंभकी उचाई आदिको करै और अन्य नक्षत्र आदिको वर्जदे. गृहके विस्तारसे (चौडाई) गुणित दैर्घ्य (लम्बाई)को आठसे वि
भक्त करे (भागदे) ॥ १७७ ॥ जो शेषबचै वें आय ध्वज आदि होतेहैं, उनके ये आठ भेदहैं,, ध्वज धूम्र सिंह श्वान गौ गर्दभ हाथी काग ये
आठ प्रकारकी ध्वजा आदि होतेहैं ॥१७८॥ और इन आय ध्वजाआदियोंकी स्थिति होतीहै अपने स्थानसे पांचमें स्थानमें महान् वैर हो

विष्कंभगण्डपरिघंवर्जयोगेषुकारयेत् ॥ स्वातीमैत्रेथमाहेन्द्रेगान्धर्वेभगरोहिणे ॥१७६॥ स्तम्भोच्छ्रायादिकर्तव्यमन्यत्रपरिवर्जयेत्॥वि
स्तारेणहतंदैर्घ्यंविभजेदष्टभिस्ततः॥१७७॥यच्छेषंसंभवेदायोध्वजाद्यास्तेस्युरष्टधा॥ध्वजोधूम्रोहरिः श्वागौः खरेभौवायसोष्टमः॥१७८॥
पूर्वादिदिक्षुचाष्टानांध्वजादीनामपिस्थितिः ॥ स्वस्थानात्पञ्चमेस्थानेवैरत्वञ्चमहद्भवेत् ॥ १७९ ॥ विषमायः शुभः प्रोक्तः समायः
शोकदुःखदः ॥ स्वस्थानगाबलिष्ठाः स्युर्नचान्यस्थानगाः शुभाः ॥ १८० ॥ ध्वजः सिंहेतौचगजेह्येतेगविशुभप्रदाः ॥ वृषोनपूजि
तोह्यत्रध्वजः सर्वत्रपूजितः ॥ १८१ ॥ वृषसिंहगजाश्चैवपुटकर्पटकोटयोः ॥ द्विपः पुनः प्रयोक्तव्योवापीकूपसरःसुच ॥ १८२ ॥
मृगेन्द्रमासनेदद्याच्छयनेषुगजंपुनः ॥ वृषम्भोजनपात्रेषुछत्रादिषुपुनर्ध्वजम् ॥ १८३ ॥ अग्निवेश्मसुसर्वेषुगृहेवस्तूपजीविनाम् ॥
धूमंनियोजयेत्केचिच्छ्वानंम्लेच्छादिजातिषु ॥ १८४ ॥

ताहै ॥१७९॥ विषम आय (विस्तार) शुभ कहाहै और सम आय शोक और दुःखका दाता होताहै अपने स्थानके गृह बलिष्ठ होतेहैं और अन्य
स्थानके नहीं होते॥१८०॥ध्वज सिंह और हाथी गौ ये शुभदायी होतेहैं वृष (बैल) पूजित नहीं होता और ध्वजा सर्वत्र पूजित होतीहै ॥१८१॥
वृष सिंह गज ये पुट कर्पट और कोटमें और हाथी वापी कूप और तडागमें करना योग्यहै॥१८२॥सिंहकी ध्वजा आसनमें हाथीकी ध्वजा
शयनमें भोजनके पात्रोंमें वृषकी और छत्र आदिमें ध्वजाको बनवावै ॥१८३॥ और अग्निके सब स्थानोंमें और वस्त्रोंसे जो जीविका करतेहैं

उनके गृहोंमें धूमकी ध्वजाओंको बनवावै और कोई यह कहतेहैं कि म्लेच्छआदि जातीयोंमें श्वानकी ध्वजा बनावै ॥ १८४ ॥ वैश्य के गृहमें खरकी ध्वजा श्रेष्ठहै और शेषकुटीआदिमें काककी ध्वजा श्रेष्ठ है और वृष सिंह ध्वज ये प्रासाद पुर और वेश्म इनमें श्रेष्ठ होतेहैं ॥ १८५ ॥ गजायमें वा ध्वजायमें हाथीयोंका घर शुभ होताहै और ध्वजायमें अश्वोंका स्थान और खरायमें और वृषमें ॥ १८६ ॥ गजाय वा वृषध्वजमें पशुओंका स्थान उष्ट्रोंका गृह करवावै तो शुभदायी होता है ॥ १८७ ॥ शय्याके

खरोवैश्यगृहेशस्तोध्वांक्षः शेषकुटीषुच ॥ वृषसिंहध्वजाश्चापिप्रासादपुरवेश्मसु ॥ १८५ ॥ गजायेवांध्वजायेवागजानांसदनं शुभम् ॥ अश्वालयंध्वजायेचखरायेवृषभेपिवा ॥ १८६ ॥ उष्ट्राणांमन्दिरङ्कार्यङ्गजायेवावृषध्वजे ॥ पशुसद्मवृषायेचध्वजाये वाशुभप्रदम् ॥ १८७ ॥ शय्यासुवृषभः शस्तः पीठेसिंहः शुभप्रदः ॥ अमत्रच्छत्रवस्त्राणांवृषायेवाध्वजेपिवा ॥ १८८ ॥ पादुकोपानहौकार्यौसिंहायेप्यथवाध्वजे ॥ स्वर्णरूप्यादिधातूनामन्येषांतुध्वजःस्मृतः ॥ १८९ ॥ ब्राह्मणेषुध्वजः शस्तः प्रतीच्याङ्कारयेन्मुखम् ॥ सिंहश्चभूभृतांशस्त उदीच्याञ्चमुखंशुभम् ॥ १९० ॥ विशांवृषः प्रागवदनंशूद्राणांदक्षिणेगजः ॥ सर्वेषामेवचायानांध्वजः श्रेष्ठतमोमतः ॥ १९१ ॥

स्थानमें वृषराशि और पीठ (आसन) के स्थानमें सिंह शुभदायी होते हैं पात्र छत्र वस्त्र इनका स्थान वृषाय वा ध्वजमें श्रेष्ठ होताहै ॥ १८८ ॥ पादुका (खडाऊ) और उपानह ये दोनों वृषाय वा ध्वजमें करनें सुवर्ण और रौप्यआदि धातु और अन्य स्थानमें ध्वज श्रेष्ठ कहाहै ॥ १८९ ॥ ब्राह्मणोंमें ध्वज श्रेष्ठ होताहै और ब्राह्मण पश्चिमदिशाको गृहका मुख बनवावै क्षत्रियोंको सिंह श्रेष्ठ कहाहै और उत्तरको गृहका मुख श्रेष्ठ कहाहै ॥ १९० ॥ वैश्योंको वृष श्रेष्ठ कहाहै और पूर्वाभिमुख गृह शुभ होताहै और शूद्रोंको गजाय और दक्षिणा

भिमुख गृह श्रेष्ठ कहेहैं और सब आयोंमें गजका आय श्रेष्ठ कहाहै॥१९१॥क्षत्रिय और वैश्योंको ध्वजाय श्रेष्ठ कहाहै यह बृहस्पतिने कहाहै धर्मका अभिलाषी ब्राह्मण सिंहायको अवश्य त्यागदे ॥ १९२ ॥ सिंहके आयमें घरमें चण्डता और अल्पसन्तान होतीहै,ध्वजायमें पूर्ण सिद्धि और वृषाय पशुओंकी वृद्धि देताहै ॥ १९३ ॥ गजायमें समस्त संपदा बढतीहै शेष आय शोक और दुःखके दाता होतेहैं गृह के पिण्डको अर्थात् हाथोंकी संख्याको नौ ९ नौ ९ ॥ ६ ॥ ८ ॥ ३ ॥ ७ ॥ ८ ॥ ७ ॥ ८ ॥ ॥ १९४ ॥ इनसे गुणने और क्रमसे,नाग ८ ॥

ध्वजायः क्षत्रियविशोः प्रशस्तोगुरुरब्रवीत् ॥ सिंहायः सर्वथात्याज्योब्राह्मणेनंवृषेप्सुना ॥ १९२ ॥ सिंहायेचण्डतागेहेअल्पापत्यः प्रजायते ॥ ध्वजायेपूर्णसिद्धिः स्याद्वृषायः पशुवृद्धिदः ॥ १९३ ॥ गजायेसंपदांवृद्धिः शेषायाः शोकदुःखदाः ॥ पिण्डेनवाङ्काङ्गग जवन्हिनागाष्टसागरैः ॥ १९४ ॥ नागैश्वगुणितेभक्तेक्रमादेतेपदार्थकाः ॥ नागाद्रिनवसूर्य्याष्टभातिथ्यृक्षखभानुभिः ॥ १९५ ॥ आयो वारोंशकोद्रव्यमृणमृक्षांतिथिर्युतिः ॥ आयुश्चाथगृहेशर्क्षगृहभैक्यंमृतिप्रदम् ॥ १९६ ॥ संपूर्णाः शुभदाह्येतेह्यसंपूर्णास्त्वनिष्टदाः ॥ धिष्ण्येचवसुभिर्भक्तेव्ययः स्याच्छेषकाङ्कके ॥ १९७ ॥ धनाधिकंगृहवृद्ध्यैनिर्द्धनायऋणाधिकम् ॥ व्ययान्वितेक्षेत्रफलेध्रुवा द्यक्षरसंयुते ॥ १९८ ॥

॥ ७ ॥ ९ ॥ १२ ॥ ८॥१२ ॥ १५ ॥ २७ ॥ १२० ॥ इनका भाग देनेपर ये पदार्थ क्रमसे होतेहैं ॥१९५॥ कि आय वार अंशक द्रव्य ऋण नक्षत्र तिथि युति और आयु और गृहके स्वामीका नक्षत्र और गृहका नक्षत्र एक होजाय तो गृह मृत्युका दाता होताहै ॥ १९६ ॥ ये संपूर्ण शुभके दाता और जो असंपूर्ण होय तो अनिष्टको देतेहैं और गृहमें ८ आठका भाग देनेपर जो शेष अंक रहै उसमें व्यय होताहै ॥ १९७ ॥ जिस घरमें धन अधिकहो उसमें वृद्धि और जिसमें ऋण अधिक हो उसमें निर्धनता होतीहै व्ययसे युक्त क्षेत्रके फलमें

ध्रुवआदि अक्षरोंको मिलाकर ॥ १९८ ॥ और तीनका भाग देकर शेषमें क्रमसे इन्द्र यम भूमिका स्वामी इनके अंशक होते हैं इंद्रके अंशमें पदवीकी वृद्धि और महान् सुख होताहै ॥ १९९ ॥ यमके अंशमें मरण और अनेक प्रकारके निश्चयसे रोग शोक होतेहैं राजाके अंशमें धन धान्यकी प्राप्ति और पुत्रोंकी वृद्धि होतीहै ॥ २०० ॥ और राशिकूट आदि संपूर्णकी चिन्ताभी गृहके आरंभमें करै दुसरी और बारमीं राशि गृह और गृहके स्वामीके होय तो निश्चयसे दरिद्रता होतीहै और त्रिकोण (९।५) में सन्तानका अभाव होताहै ॥ २०१ ॥ और ज षडष्टक (६।८) में धनका अभाव और विपरीत (८।६) में धन कहाहै और द्यून ७ में पुत्र स्त्रीका लाभ होताहै ॥ २०२ ॥ और ज

त्रिभिःशेषेक्रमादिन्द्रयमभूम्याधिपांशकाः ॥ इन्द्रांशेपदवीवृद्धिर्महत्सौख्यंप्रजायते ॥ १९९ ॥ यमांशेमरणंनूनंरोगशोकमनेकधा ॥ राजांशेधनधान्याप्तिः पुत्रवृद्धिश्चजायते ॥ २०० ॥ राशिकूटादिकंसर्वंदम्पत्योरिवचिन्तयेत् ॥ नैःस्वंद्विर्द्वादशेनूनंत्रिकोणेह्यन पत्यता ॥ २०१ ॥ षडष्टकेनैधनंस्याद्व्यत्ययेनधनंस्मृतम् ॥ द्यूनस्थितेपुत्रलाभंस्त्रीलाभश्चतथैवच ॥ २०२ ॥ जन्मतृतीयेच तथाधनधान्यागमोभवेत् ॥ दशमैकादशेचन्द्रोधनायुर्बहुपुत्रदः ॥ २०३ ॥ चतुर्थाष्टमरिष्फस्थोमृत्युपुत्रविनाशदः ॥ त्रिको णेत्वनपत्यंस्यात्केचिद्बन्धुगृहेशुभम् ॥ २०४ ॥ वदन्तिचन्द्रंमुनयोनैतन्ममनतंस्मृतम् ॥ अश्विन्यादित्रयंमेषेसिंहेप्रोक्तंमघा त्रयम् ॥ २०५ ॥ मूलादित्रितयश्चापेशेषराशिद्विकेद्विके ॥ सूर्य्यारवारराश्यंशाः सदावह्निभयप्रदाः ॥ २०६ ॥

न्मसे तीसरी राशिमें धन धान्यका आगमन होताहै दशमा और ग्यारमां चंद्रमा धन आयु और बहुत पुत्रोंको देताहै ॥ २०३ ॥ चौथा आठमां बारमां चंद्रमा मृत्यु और पुत्रोंके नाशको देताहै और त्रिकोण (९।५) में सन्तानका अभाव और कोई आचार्य त्रिकोण को बन्धु गृहमें शुभ ॥ २०४ ॥ चंद्रमाको मुनिजन कहतेहैं यह मेरा मत नहीं अश्विनीसे आदिलेकर तीन नक्षत्र मेषमें और मघा आदि तीन सिंहमें कहे हैं ॥ २०५ ॥ और मूलआदि तीन धनमें कहेहैं और शेषराशि दोदो नक्षत्रोंमें समझनी आदित्य और मंगलवार

और इनकी राशियोंके अंश सदैव अग्निके भयको देतेहैं ॥ २०६ ॥ और शेष गृहोंके वार अंश कर्ताकी इष्टसिद्धिको देतेहैं गृहका
आगत नक्षत्र यदि राशिरूपहो ॥ २०७ ॥ तो उसके नवांशके वशसे सदैव गृहको जानै विपत्तारा विपत्तिको देतीहै प्रत्यरि प्रति
कूल (उलटा) फलको देतीहै ॥ २०८ ॥ निधन नामकी तारा सर्वथा मरणको देतीहै वर्जने योग्य ताराओंमें इन ताराओंमें गृहानिर्मा
ण अशुभदायी होताहै ॥ २०९ ॥ प्रत्यरितारा महान् भयको देतीहै और तेईसमें नक्षत्रमें होय तो मृत्युको देतीहै निधन नामकी जो

शेषग्रहणाम्वारांशाः कर्त्तुरिष्टार्थसिद्धिदाः॥गृहस्यागतभंयत्तुतद्विराश्यात्मकंयदि॥२०७॥तन्नवांशवशात्तत्रज्ञातव्यंसर्वदागृहम्॥ विपत्प्र
दाविपत्ताराप्रत्यरीप्रतिकूलदा ॥ २०८॥ निधनाख्यातुयातारासर्वथानिधनप्रदा ॥ विवर्ज्यतारकास्वेतन्निर्माणमशुभप्रदम् ॥२०९॥
प्रत्यरिस्तूग्रभयदात्रिविंशर्क्षेतुमृत्युदा ॥ निधनाख्यातुयातारास्त्रीसुतार्तिप्रदायिनी ॥२१०॥ कुर्वन्नज्ञानतोमोहाद्दुःखभाग्व्याधिभाग्भ
वेत् ॥ तिथौरिक्तेदरिद्रत्वंदर्शेगर्भनिपातनम् ॥ २११ ॥ कुयोगेधनधान्यादिनाशः पातश्चमृत्युदः ॥ वैधृतिः सर्वनाशायनक्षत्रैक्येतथै
वच ॥ २१२ ॥ आयुर्विहीनेगेहेतुदुर्भगत्वम्प्रजायते ॥ नाडीवेधोनशुभदस्ताराऽरोगभयप्रदा ॥ २१३ ॥ गणवैरेपुत्रहानिर्धन
हानिस्तथैवच ॥ योनौकलिर्महादुःखंयमांशेमरणद्वयम् ॥ २१४ ॥

तारा है वह स्त्री और पुत्रोंको दुःखदायी होती है ॥ २१० ॥ अज्ञान वा मोहसे इनमें गृहको बनावै तो दुःख और व्याधिका भोगी होताहै
रिक्ता तिथिमें दरिद्रता और अमावस्यामें गर्भका पात होताहै ॥ २११॥ कुयोगमें धन धान्य आदिका नाश और पात मृत्युको देताहै और
वैधृति और नक्षत्रकी एकतामें सबका नाश होताहै॥ २१२ ॥ अवस्थासे हीन घर होय तो स्वामी दुर्भागी होताहै नाडीका वेध अशुभको
देताहै और तारा रोग और भयको देतीहै ॥ २१३ ॥ गणके वैरमें पुत्र और धनकी हानि होती है और योनिमें कलह और

महादुःख होताहै और यमके अंशमें दोनोंका मरण होताहै ॥ २१४ ॥ नक्षत्रकी एकतामें स्वामीकी मृत्यु और वंशका नाश-वर्णकी एकतामें होताहै-पापग्रहके वारमें दरिद्रता और बालकोंका मरण होताहै ॥ २१५ ॥ कोई आचार्य शनैश्चर की प्रशंसा करतेहैं परन्तु शनैश्चरमें चौरोंका भय होताहै हेवरानने (पार्वती) स्वामीके हस्तप्रमाणसे गृहको बनावै रेखासे लेकर हस्तपर्यन्त विषम संख्या श्रेष्ठ कहीहै ॥ २१६ ॥ हाथके प्रमाणसे अधिक होय तो अंगुलोंको लेकर वा छोडकर गणित

नक्षत्रैक्येस्वामिमृत्युर्वर्णैवंशविनाशनम् ॥ पापवारेदरिद्रत्वंशिशूनाम्मरणन्तथा ॥ २१५ ॥ केचिच्छंनिंप्रशंसन्तिचौरभीति स्तुजायते ॥ स्वामिहस्तप्रमाणेनगृहंकुर्याद्वरानने ॥ रेखादिहस्तपर्यन्तमोजसंख्याप्रशस्यते ॥ २१६ ॥ करमानादधिकंचेत्तदाङ्गुला निप्रदायहित्वाच ॥ क्षेत्रफलङ्गणितेनप्रसाधयेदिष्टसिद्धचर्थम् ॥ २१७ ॥ करमानादधिकंचेदङ्गुलानिप्रसाधयेत् ॥ दीर्घेदेयानिवानूनं नविस्तीर्णेकदाचन ॥ २१८ ॥ अङ्गुलैः कल्पितानाभिर्वर्गीकृत्यपदंभवेत् ॥ प्राप्तहस्तादिमानंस्यात्कुर्य्यादापतनंततः ॥ २१९ ॥ एकादशकरादूर्ध्वंयावद्द्वात्रिंशहस्तकम् ॥ तावदायादिकंचिंत्यंतदूर्ध्वंनैवचिन्तयेत् ॥ २२० ॥ आयव्ययौमासशुद्धिंनजीर्णोंचिन्त येद्गृहे ॥ शिलान्यासम्प्रकुर्वीतमध्येतस्यविधानतः ॥ २२१ ॥

से क्षेत्रफलको इष्ट सिद्धिके लिये सिद्धकरै ॥ २१७ ॥ हाथके मानसे अधिक होय तो अंगुलिको सिद्धकरै और गृहके दीर्घ (लंबाई) में अंगुलोंको दे और विस्तारमें कदाचित् न दे ॥ २१८ ॥ अंगुलोंसे कल्पना की जो नाभि है उसका वर्ग करनेसे पद होताहै इस प्रकार प्राप्त हुआ जो हस्तआदिका मान उसको करकै फिर गृहको बनवावै ॥ २१९ ॥ ग्यारह हाथसे आगै बत्तीस हाथ पर्यन्त आयादिककी चिन्ताकरै और उसके ऊपर नकरै ॥ २२० ॥ आय व्यय और मासकी शुद्धि इनकी

चिन्ता जीर्ण गृहमें नकरै और गृहके मध्यमें विधिपूर्वक शिलाका स्थापन करै ॥ २२१ ॥ ईशान दिशामें देवतागृह पूर्वमें स्नानका मंदिर अग्निकोणमें पाकका स्थान और उत्तरमें भाण्डोंका स्थान बनवावै ॥ २२२ ॥ अग्नि और पूर्वके मध्यमें दधिमथनेका मंदिर अग्नि और दक्षिण दिशाके मध्यमें घृतका घर श्रेष्ठ कहाहै ॥ २२३ ॥ दक्षिण और नैर्ऋतिके मध्यमें मलके त्यागनेका स्थान और नैर्ऋत और पश्चिमके मध्यमें विद्याके अभ्यासका मन्दिर बनवावै ॥ २२४ ॥ पश्चिम और वायुकोणके

ईशान्यांदेवतागेहम्पूर्वस्यांस्नानमन्दिरम् ॥ आग्नेय्यांपाकसदनंभाण्डाशगारमुत्तरे ॥ २२२ ॥ आग्नेयपूर्वयोर्मध्येदधिमन्थनमन्दिरम् ॥ अग्निप्रेतेशयोर्मध्येआज्यगेहंप्रशस्यते ॥ २२३ ॥ याम्यनैर्ऋत्ययोर्मध्येपुरीषत्यागमन्दिरम् ॥ नैर्ऋत्याम्बुपयोर्मध्येविद्याभ्यासस्य मन्दिरम् ॥ २२४ ॥ पश्चिमानिलयोर्मध्येरोदनार्थगृहंस्मृतम् ॥ वायव्योत्तरयोर्मध्येरतिगेहंप्रशस्यते ॥ २२५ ॥ उत्तरेशान योर्मध्येऔषधार्थन्तुकारयेत् ॥ नैर्ऋत्यांसूतिकागेहन्नृपाणांभूतिमिच्छताम् ॥ २२६ ॥ आसन्नप्रसवेमासिकुर्याच्चैवविशेषतः ॥ तद्वत्प्रसवकालेस्यादितिशास्त्रेषुनिश्चयः ॥ २२७ ॥ मासेतुनवमेप्राप्तेपूर्वपक्षेशुभेदिने ॥ प्रसूतिसंभवेकालेगृहारम्भणमिष्यते ॥ २२८ ॥ गुरोरधोलघुःस्थाप्यः पुरस्तादूर्ध्ववन्न्यसेत् ॥ गुरुभिःपश्चिमेपूर्वेसर्वलघ्ववाधिर्विधिः ॥ २२९ ॥

मध्यमें रोदनका घर कहाहै वायु और उत्तरके मध्यमें रति (भोग) का घर श्रेष्ठ कहाहै ॥ २२५ ॥ उत्तर और ईशानके मध्यमें औषधका स्थान बनवावै और भूमिके अभिलाषी राजाओंको सूतिकाका घर नैर्ऋत दिशामें कहाहै ॥ २२६ ॥ वह विशेष कर प्रसव कालके समीप मासमें करना और तैसेहीं प्रसव कालमें बनवावै यह शास्त्रोंका निश्चयहै ॥ २२७ ॥ नवम मासके आनेपर पूर्वपक्षके शुभ दिनमें प्रसूतिके प्रारंभ समयमें गृहका आरंभ श्रेष्ठ कहाहै ॥ २२८ ॥ गुरुके नीचे लघुकी स्थापना

करै और उसके आगे ऊर्द्धके समान स्थापनाकरै गुरुओंसे पश्चिम और पूर्वमें सब लघुओंकी अवधिकी विधि होतीहै ॥ २२९ ॥ लघुस्थानमें अलिंद (देहली) को रक्खै और गुरुस्थानमें नरक्खै गृहके द्वारसे प्रदक्षिण क्रमसे जो अलिंदहैं उनके सोलह १६ प्रकार होतेहैं ॥ २३० ॥ पहिला गृह ध्रुव संज्ञक धन धान्यका और सुखका दाता होताहै दूसरा धान्य नामक गृह मनुष्योंको धान्य देता है और तीसरा जय विजयको देताहै ॥ २३१ ॥ और चौथा नंद स्त्रियोंकी हानिको निश्चयसे देताहै और खर सम्पत्तिका नाश

स्यादलिन्दोलघुस्थानेनालिन्दंगुरुमाश्रितम् ॥ प्रदक्षिणैर्गृहद्वारादलिन्दैर्दशषड्विधा ॥ २३० ॥ ध्रुवसंज्ञंगृहंत्वाद्यंधनधान्यसुखप्रदम् ॥ धान्यन्धान्यप्रदंनॄणांजयंस्याद्विजयप्रदम् ॥ २३१ ॥ नन्दंस्त्रीहानिदंनूनंखरंसंपद्विनाशनम् ॥ पुत्रपौत्रप्रदङ्कान्तंश्रीप्रदंस्यान्मनोरमम् ॥ २३२ ॥ सुवक्रम्भोगदन्नूनन्दुर्मुखंविमुखप्रदम् ॥ सर्वदुःखप्रदंक्रूरंविपलंशत्रुभीतिदम् ॥ २३३ ॥ धनदन्धनदंगेहंक्षयंसर्वक्षयावहम् ॥ आक्रन्दंशोकजनकंविपुलंश्रीयशःप्रदम् ॥ २३४ ॥ विपुलंनामसदृशन्धनदंविजयाभिधम् ॥ २३५ ॥ प्रदक्षिणेसप्तमुखादलिन्दंविद्याल्लघुस्थानसमाश्रितञ्च ॥ गृहस्यपूर्वादिगतेष्वलिन्देष्वेवंभवेयुर्दशषड्भेदाः ॥ २३६ ॥ भवेयुर्नशुभालिन्दंगृहङ्कापालसंज्ञकम् ॥ विस्ताराद्द्विगुणङ्गेहंगृहस्वामिविनाशनम् ॥ २३७ ॥

करताहै कान्त गृह पुत्र पौत्रोंको देताहै मनोरम गृह लक्ष्मीको देताहै ॥ २३२ ॥ सुवक्र गृह निश्चयसे भोग देताहै दुर्मुख गृह विमुखताको देताहै क्रूरगृह सब दुःखोंको देताहै विपुल गृह सब शत्रुओंकी भीतिको देताहै ॥ २३३ ॥ धनदगृह धनको देताहै क्षय सबके क्षयको देताहै आक्रंद शोकको पैदा करताहै विपुल श्री और यशको देताहै ॥ २३४ ॥ विपुल नामके सदृश फलको देताहै और धनदगृहको विजय कहतेहैं ॥ २३५ ॥ प्रदक्षिण क्रमसे सप्त मुखसे लघुस्थानमें रक्खे हुए अलिंदको जानैं गृहके पूर्व आदि दिशाओंमें रक्खेहुए अलिन्दोंमें क्रमसे सोलह भेद होतेहैं ॥ २३६ ॥ जिसमें शुभ अलिंद न हो वह गृह कापाल

नामका होताहै विस्तारसे दूना गृह- गृह और स्वामी दोनोंको नष्ट करताहै ॥ २३७ ॥ उस गृहको निरर्थक कहतेहैं और उसमें राजासे भय होताहै और कोई बुद्धिमान् मनुष्य आलिन्दसे रहित द्वारको कहते हैं ॥ २३८ ॥ और कोई अलिंद और शालाको और कोई आलिंदकको कहतेहैं घरसे बाहिरकी जो दिशा हैं और जो गृहसे अत्यंत निकसी हुई॥२३९॥काष्ठा हैं वे, काष्ठका जो घर वह अलिंदसंज्ञक कहाताहै गृहके बाहिरकी जो दिशा और गृहके भीतरकी जो दिशाहैं उनका ॥२४०॥ कोष्ठरूपसे बनाया जो तिरछा घर

निरर्थकन्तद्गृहंस्याद्भयंवाराजसंभवम् ॥ केचिदलिन्दकंद्वारंप्रवदन्तिमनीषिणः ॥ २३८ ॥ केचिदलिन्दंशालाञ्चकेचिच्चालिन्दक ञ्चतत् ॥ गृहबाह्यस्थिताःकाष्ठागृहमत्यन्तनिर्गताः ॥ २३९ ॥ काष्ठाकाष्ठस्ययद्गेहन्तद्वाचालिन्दसंज्ञकम् ॥ गृहाद्बहिश्चये काष्ठागृहस्यांतर्गताश्चये ॥ २४० ॥ तेषाङ्कोष्ठीकृतन्तिर्यग्गेहञ्चालिन्दसंज्ञकम् ॥ स्तंभहीनंगृहाद्बाह्यान्निर्गतङ्काष्ठनिर्मितम् ॥ २४१ ॥ मध्यादूर्ध्वंगतङ्गेहंतच्चवालिंदसंज्ञकम् ॥ यत्रालिन्दश्चतत्रैवद्वारमार्गप्रशस्यते ॥ २४२ ॥ अलिन्दंद्वारहीनञ्चगृहंकोटीसमंस्मृतम् ॥ यत्रालिन्दंतत्रशालातत्रद्वारञ्चशोभनम् ॥ २४३ ॥ शालालिन्दद्वारहीनंनगृहङ्कारयेद्बुधः ॥ यद्वास्तुनिचविस्तारः सैवोच्छ्रायः शुभः स्मृतः ॥ २४४ ॥ शूकशालोगृहः कर्योविस्ताराद्द्विगुणोदश ॥ चतुःशालगृहस्यैवमुच्छ्रायोव्यासससम्मितः ॥ २४५ ॥

उसको अलिन्द कहतेहैं वह स्तंभसे हीन घरसे बाहिरको निकसा हुआ काष्ठका होताहै॥२४१॥ गृहके मध्यसे ऊर्ध्व भागमें गयाहुआ जो घर है कोई उसे अलिंद कहतेहैं. जिस भागमें आलिंद हो उसीमें द्वारका मार्ग श्रेष्ठ कहाहै ॥ २४२ ॥ आलिंद और द्वारसे हीन गृहको टके समान कहाहै जहां अलिंद हो वहीं शाला और द्वार श्रेष्ठ कहाहै ॥ २४३ ॥ शाला आलिंद द्वार इनसे हीन गृहको बुद्धिमान् मनुष्य न बनवावै जो वास्तुका विस्तारहो उतनीही उंचाई शुभ कहीहै ॥ २४४ ॥ विस्तारसे दूना शूकशाल नामका गृह बनवाना दश और

चारशालाके गृहकी उंचाई व्यासके समान होतीहै ॥ २४५ ॥ विस्तारसे दूनी लंबाई एकशाला (एकमजला) के गृहकी होतीहै जो गृह विस्तीर्ण होताहै वह उंचाईमें एक शालाका होताहै ॥२४६॥ और द्विशालमें दूना और त्रिशालमें त्रिगुण कहाहै और चतुःशालमें पंचगुणा जानना उससे ऊपर गृहको न बनवावै ॥२४७॥ जिसकी शिखा गृहके त्रिभागकी हो वह उत्तमसंज्ञक होताहै यदि एकशाला गृहकी आज्ञा य तब आठ और सताईसकी संशुद्धि (भाग) से सौम्यवर्जित अर्थात् उत्तरशालासे हीन करना और यदि दोशालाओंसे युक्त घर बनाना होय तो दक्षिण और पश्चिममें शाला बनानी॥२४८॥और तीन शालाका घर बनाना होय तो पूर्वकी वा उत्तरकी शालासे रहित घर बनाना और

विस्तारादूद्विगुणंदैर्घ्यमेकशालेप्रशस्यते ॥ विस्तीर्णयद्भवेद्गेहन्तदूर्ध्वंत्वेकशालकम् ॥ २४६ ॥ द्विशालेद्विगुणम्प्रोक्तन्त्रिशालेत्रिगुणन्तथा ॥ चतुश्शालेपञ्चगुणंतदूर्ध्वन्नैवकारयेत् ॥ २४७ ॥ शिखाचैवत्रिभागन्तुगृहश्चोत्तमसंज्ञकम् ॥ एकन्नागोडुसंशुद्ध्याद्वेचदक्षिणपश्चिमा ॥ २४८ ॥ त्रिशालेपूर्वतोहीनङ्कार्यंवासौम्यवर्जितः ॥ ऊर्ध्वभागत्रयन्त्यक्त्वाअधोभागद्वयन्तथा ॥२४९॥ मध्येनाभिंविजानीयादितिप्राहपराशरः ॥ पूर्वादिषुचतुर्दिक्षुवाममेकादयोध्रुवाः ॥२५०॥ विस्तारस्याथदैर्घ्यस्यतथैवैकैकसंयुतम् ॥ वामंवातादिकोणेषुध्रुवंविस्तारदैर्घ्ययोः ॥ २५१ ॥ एकाद्याः स्वेच्छयासर्वेकार्यावेदसमन्विताः ॥ अनेनैवप्रकारेणक्रियमाणेचवास्तुनि ॥ २५२ ॥

शालाका विभागभी इसी पूर्वोक्त विधिसे करना पूर्वमें उपर तीनभागको छोडकर और पश्चिममें दो भागोंको छोडकर॥३४९॥जो मध्यभाग होताहै वह नाभि जाननी यह पराशर ऋषिने कहाहै उसमें शालाको बनवावै इसी प्रकार पूर्व आदि चारों दिशाओंमें एक आदि ध्रुव वाममार्गसे होते हैं॥२५०॥ विस्तार और दैर्घ्य (अर्थात्) चौडाई और लंबाईके एक एक भागको मिलाकर वायव्य आदि कोणोंमें विस्तार और दैर्घ्यका ध्रुव होताहै वह ध्रुव उत्तर शालासे हीन घरमें न देना॥२५१॥एक शालावाले गृहसे लेकर चार शालापर्यन्त गृह बनवाने इसीप्रकारसे बन

वाने योग्य शालासे युक्त गृहमें ॥२५२॥ पहिले आचार्य आयव्यय आदिकी जो शुद्धि उसका विचार नहीं करते अर्थात् एकशालायुक्त गृहमें आय व्यय आदिका विचार करना और दोशालासे युक्तमें नहीं करना क्योंकि निर्गम और अलिंद आदि जो गृहोंकी चारों दिशाओंमें हैं वे गृहोंके चारों दिशाओंमें जो होतेहैं वे सब दोशाला आदिके घरमें नहीं मानने और न. वास्तुशालाआदिका विचार करना ॥ २५३ ॥

आयव्ययादिसंशुद्धिंनचिंतयंतिपूर्वजाः ॥ अस्यार्थः ॥ यदिवास्तुनिएकमेवगृहंक्रियतेतदानागोड्डुसंशुद्धयासौम्यवर्जितमुत्तरशालाहीनंगृहं यदिद्विशालकंगृहंक्रियतेतदादक्षिणपश्चिमेशालाकार्या त्रिशालेपूर्वतोहीनंकार्यं त्रिशालेउत्तरशालयावाहीनंकार्यं शालाविभागस्तु अनेनैवविधानेनकार्यः पूर्वेऊर्द्धभागत्रयंत्यक्त्वापश्चिमेभागद्वयंत्यक्त्वायोमध्यगतोभागः सनाभिः तत्रशालानविधेया ॥ अनेनैवप्रकारेणपूर्वादिदिक्षुएकादयोविस्तारदैर्घ्यस्यएकैकंभागंसंयोज्यवातादिकोणेषुउत्तरशालाहीनत्वांन्नदेयंसर्वेएकाद्याश्चतुःशालांतावेदसमन्विताः कार्याः ॥ अनेनैवप्रकारेणशालायुतेवास्तुनिआयव्ययादिशुद्धिर्नचिन्तनीया ॥ एकशालेआयव्ययादिनिचारःकर्तव्यःद्विशालेआयव्ययादिशुद्धिर्नविचारणीया यतः निर्गमालिंदानिपूर्वादीनियानिचतुर्दिशंवेश्मनांतानिनग्राह्याणि ॥ नोतद्वास्तुपरिग्रहाः ॥ २५३ ॥ ब्राह्मणानांचतुःशालंक्षत्रियाणांत्रिशालकम् ॥ द्विशालंस्यात्तुवैश्यानांशूद्राणामेकशालकम् ॥ २५४ ॥ सर्वेषामेववर्णानामेकशालंप्रशस्यते ॥ एकशालन्द्विशालंवात्रिशालन्तुयशालकम् ॥ २५५ ॥ यथालिन्दंगृहंकुर्यात्तादृक्शालाप्रशस्यते ॥ शालादिभिर्नकर्त्तव्यंनकुर्यात्तुङ्गनिम्नकम् ॥ २५६ ॥

ब्राह्मणोंका गृह चार शालाओंका क्षत्रियोंका तीन शालाओंका वैश्योंका दोशालाओंका और शूद्रोंका एक शालाओंका होताहै॥२५४॥ और सब वर्णोंका एक शालाओंका घर श्रेष्ठ कहाहै एक २।३।४। शालाके ॥ २५५ ॥ गृहमें जिसप्रकार अलिंद आदि बनवावै उसी प्रका

रकी शाला श्रेष्ठ होतीहै और केवल शाला आदि युक्त गृहको और कहीं ऊंचै और कहीं नीचे गृहको न बनवावै ॥ २५६ ॥ तिससे समान शालाको और समान (बराबर) परकोटेको बनवावै कर्क वृश्चिक मीन ये उत्तरके द्वारमें स्थित होतेहैं ॥ २५७ ॥ मेष सिंह धन ये पूर्वके द्वारमें स्थित होतेहैं वृष मकर कन्या ये दक्षिणके द्वारमें स्थित होतेहैं ॥ २५८ ॥ मिथुन तुल कुंभ ये पश्चिमके द्वारमें स्थित होतेहैं और इसी क्रमसे ब्राह्मण क्षत्रिय वैश्य शूद्रोंका वास होताहै ॥ २५९ ॥ जिस दिशाकी राशि कहीहैं उसी दिशामें शाला श्रेष्ठ होतीहै अथवा

समांशालान्ततःकुर्यात्समंप्राकारमेवच ॥ कुलीरवृश्चिकौमीनउत्तरद्वारसंस्थिताः ॥ २५७ ॥ मेषसिंहधनुर्द्धाराःपूर्वद्वारेषुसंस्थिताः ॥ वृषभंमकरंकन्यायाम्यद्वारेसमाश्रिताः ॥ २५८ ॥ मिथुनंतुलकुंभौचपश्चिमद्वारमाश्रिताः ॥ ब्राह्मणाः क्षत्रियावैश्याः शूद्राश्चैवयथा क्रमम् ॥ २५९ ॥ यद्दिशाराशयः प्रोक्तास्तस्मिन्शालाप्रशस्यते ॥ अथवापूर्वभागेतुब्राह्मणाउत्तरेनृपाः ॥ २६० ॥ वैश्यानांद क्षिणेभागेपश्चिमेशूद्रकास्तथा ॥ आग्नेयादिक्रमेणैवअन्त्यजावर्णसङ्कराः ॥ २६१ ॥ ज्ञातिभ्रष्टाश्चचौराश्वविदिक्याः शोभनाः स्मृताः ॥ ब्राह्मणाः क्षत्रियावैश्याः शूद्राः प्रागादिषुस्मृताः ॥ २६२ ॥ अष्टोत्तरशतंहस्तविस्तारान्नृपमन्दिरम् ॥ कार्यंप्रधानमन्यानितथाष्टाष्टौ चतानितु ॥ २६३ ॥ विस्तारंपादसंयुक्तंतेषान्दैर्घ्यंप्रकल्पयेत् ॥ एवंनृपाणांपञ्चैवगृहाणिशुभदानिच ॥ २६४ ॥

पूर्वभागमें ब्राह्मण उत्तरमें क्षत्रिय ॥ २६० ॥ दक्षिणमें वैश्य और पश्चिममें शूद्र और अग्निकोण आदिके क्रमसे अन्त्यज आदि वर्णसंकरोंका वास होताहै ॥ २६१ ॥ जातिसे भ्रष्ट और चौर ये विदिशाओंमें होतेहैं ब्राह्मण क्षत्रिय वैश्य और शूद्र ये पूर्व आदि दिशाओंमें कहेहैं ॥ २६२ ॥ हाथोंके विस्तारसे १०८ हाथका राजाओंका मन्दिर होताहै वही प्रधान बनवाना अन्य आठों दिशाओंके मंदिर इस क्रम से बनवाने ॥ २६३ ॥ इनके विस्तारके पादसे युक्त लम्बाईकी कल्पना करै इसप्रकार राजाओंके गृह पांचही शुभदायी होतेहैं ॥ २६४ ॥

और चौसठ ६४ हाथके घरमें छठे २ भागसे हीन वे पांच गृह होतेहैं उनका विस्तार और लंबाई छः भागसे युक्त होतीहै ॥ २६५ ॥ और चौंसठ हाथसे न्यून मंत्रीयोंके पांच घर होतेहैं और छठे ६ भागसे युक्त अथवा विस्तारसे आधी उनकी लंबाई होतीहै ॥ २६६ ॥ राजा की राणीयोंके भी पांचही गृह श्रेष्ठ लिखेहैं और वे ८० अस्सी हाथके विस्तारसे छः छः हाथ लम्बाईके होतेहैं ॥ २६७ ॥ और राणीयोंके घरकी दीर्घतासे ३० हाथ अधिक युवराजोंके घर होतेहैं और युवराजके घरसे ५० हाथ अधिक राजाके भाईयोंके घर होतेहैं ॥ २६८ ॥

षड्भिःषड्भिर्विहीनाश्चचतुःषष्टिमितस्यच ॥ पञ्चैवतस्यविस्तारंदैर्घ्यंषड्भागसंयुतम् ॥ २६५ ॥ षष्टिश्चतुर्विहीनानिवेश्मानिसाचिवस्यच ॥ पञ्चषष्ठांशसंयुक्तन्दैर्घ्यन्तस्यार्द्धमेवच ॥ २६६ ॥ नृपाणाम्महिषीणाञ्चप्रशस्तम्पञ्चचैवहि ॥ षड्भिः षड्भिश्चवर्ज्यानिअशीत्याश्चतथैवच ॥ २६७ ॥ त्रिंशद्युतन्तद्दैर्घ्यंश्चयुवराजगृहाणिच ॥ पञ्चाशदूर्ध्वंतस्यैवभ्रातॄणांप्रभवन्तिच ॥ २६८ ॥ नृपमन्त्रिगृहाणाञ्च अन्तरेयत्प्रमाणकम् ॥ सामन्तराजपुत्राणाम्प्रवराणांगृहंस्मृतम् ॥ २६९ ॥ नृपाणांयुवराजस्यगृहाणामन्तरेणयत् ॥ तद्गृहङ्कञ्चुकी वेश्याकलाज्ञानान्तथैवच ॥ २७० ॥ युवराजमन्त्रिणान्तुप्रभवेद्धियदन्तरम् ॥ अध्यक्षदूतगेहन्तत्कर्मसुकुशलाश्चये ॥ २७१ ॥ अध्यक्षाधिकृतानाञ्चरतिकोशप्रमाणकम् ॥ चत्वारिंशच्चतुर्हीनाःपञ्चगेहाभवन्तिहि ॥ २७२ ॥

और राजा मंत्री इनके घरोंके बीचका जो प्रमाण उतना घर सामंत और राजपुत्रोंमें श्रेष्ठोंका घर कहाहै ॥ २६९ ॥ राजा और युवराजके गृहोंके बीचका जो प्रमाणहै उतना घर कंचुकी वेश्या और कलाओंके ज्ञाताओंका होताहै ॥ २७० ॥ युवराज और मंत्रीयों के घरका जो मध्य प्रमाणहो उतना प्रमाणका घर अध्यक्ष (साक्षी) दूत इनके कर्ममें जो कुशल हैं उनके घर होतेहैं ॥ २७१ ॥ अध्यक्ष अधिकारी इनके घरभी रति और कोश घरके प्रमाणमें होतेहैं और छत्तीस ३६ हाथमें जिनका प्रत्येक प्रमाण हो

ऐसे पांच घर होते हैं ॥ २७२ ॥ और इनसे छठे भागसे युक्त जिनकी लम्बाई हो ऐसे घर ज्योतिषी और वैद्योंके होतेहैं और पुरोहितोंका घरभी इसी प्रकारका सुखदायी होताहै इसके अनंतर सबके गृहोंको कहताहूं ॥ २७३ ॥ ३२ बत्तीस हाथसे युक्त जिसका विस्तारहो ऐसा घर ब्राह्मणोंका होताहै और विस्तारके तुल्यहै भाग जिसका ऐसेही उनकी लंबाई होनी चाहिये ॥ २७४ ॥ और क्षत्रिय आदि तीनों वर्णोंका घर पूर्वोक्त ही समझना. राजा और सेनापतियोंके घरका जो मध्य भागहो उतने

षड्भागसंयुतन्दैर्घ्यन्दैवज्ञभिषजान्तथा ॥ पुरोहितानांशुभदंसर्वेषांकथयाम्यतः ॥ २७३ ॥ हस्तद्वात्रिंशतायुक्तंविस्तारस्याद्द्विजालयम् ॥ विस्तारसदृशांशस्तुदैर्घ्यन्तस्यप्रकल्पयेत् ॥ २७४ ॥ त्रयाणांक्षत्रियादीनामालयंपूर्वचोदितम् ॥ नृपसेनापतेर्गेहस्यान्तरंयद्भवेदिह ॥ २७५ ॥ तत्कोशगेहंभवतिरतिगेहन्तथैवच ॥ सेनापतिगृहाणाञ्चअन्तरेयत्प्रमाणकम् ॥ २७६ ॥ चातुर्वर्णस्ययद्गेहंतद्राजपुरुषंमतम् ॥ अथपारशवादीनांमातापित्रोर्यदन्तरम् ॥ २७७ ॥ ब्राह्मणस्यचयन्मानंशूद्रेणसहयद्भवेत् ॥ मूर्द्धाविसिक्तक्षत्रासुतथैवमृतकण्टकः ॥ २७८ ॥ पश्चाच्छ्रमिजनानाञ्चयथेष्टङ्कारयेद्गृहम् ॥ शतहस्तोच्छ्रितङ्कार्यंचतुःशालंगृहंभवेत् ॥ २७९ ॥ प्रमितन्त्वेकशालन्तुशुभदन्तत्प्रकीर्तितम् ॥ सेनापतिनृपादीनांसप्तत्यासहितेकृते ॥ २८० ॥

प्रमाणका कोशघर और रतिघर होतेहैं और सेनापतिके घरके मध्यका जो प्रमाणहो ॥ २७६ ॥ वह चारों वर्णोंके राजपुरुषोंका घर कहाहै और मातापिताके घरका जो मध्य प्रमाणहो उतना पारशव आदिके घरका प्रमाण होताहै ॥ २७७ ॥ ब्राह्मणके घरका प्रमाण शूद्रके घरके संग जो होय वह घर मूर्द्धाभिषिक्त और मृतकण्टकका होताहै ॥ २७८ ॥ इनके पीछे श्रमीजन (भृत्य आदि) के घरको अपनी इच्छाके अनुसार बनवावै जिस घरमें चार शाला हों उसकी उचाई सौ १०० हाथकी बनवावै ॥ २७९ ॥ और जो एक

शालाका हो वह प्रमितही सुखदायी कहाहै सेनापति और राजाके घरके प्रमाणके व्यासमें सत्तर ७० मिलाकर ॥ २८० ॥ और १४ का भाग देनेपर भागोंके प्रमाणसे शालामान कहाहै और ३५ का भाग देनेपर वही अलिंदका मान होताहै ॥ २८१ ॥ और शालाके तीसरे भागकी तुल्य वीथी (गली) बनवानी और भवनसे पूर्व भागमें उष्णीष वा वस्त्र बनवानेका स्थान और पश्चिममें शयनका स्थान होता है ॥ २८२ ॥ और जो शेषों पार्श्वोंमें अवष्टम्भ सहित और सब दिशाओंमें दृढ होताहै विस्तारके सोलमें भागमें चार हाथ मिलाकर

व्यासेचतुर्दशहृतेशालमानंविनिर्दिशेत् ॥ पञ्चत्रिंशद्धृतेन्यत्रालिन्दमानंभवेच्चतत् ॥ २८१ ॥ शालात्रिभागतुल्याचकर्तव्यावीथिकाबहिः ॥ भवनात्पूर्वतोष्णीषंपश्चात्स्वापाश्रयंभवेत् ॥ २८२ ॥ सावष्टंभंपार्श्वयोस्तुसर्वत्रसुस्थिरतंभवेत् ॥ विस्तारषोडशांशस्तु चतुर्हस्तयुतश्चयः ॥ २८३ ॥ तदन्तरस्योच्चतरंप्रमाणंप्रवदेद्बुधः ॥ द्वादशभागेनोनंचसमस्तानांप्रकल्पयेत् ॥ २८४ ॥ यजन्ते राजसूयाद्यैः क्रतुभिर्ह्यवनीश्वराः ॥ नलैरर्द्धाष्टमैस्तेषाङ्कारयेद्भवनोत्तमम् ॥ २८५ ॥ तथाचसप्तमैरेवविप्राणाङ्कारयेद्गृहम् ॥ अर्द्धषष्ठैःक्षत्रियाणांवैश्यानामर्द्धपंचमैः ॥ २८६ ॥ त्रिभिस्सार्द्धैश्चशूद्राणांभवनंशुभदंस्मृतम् ॥ स्वगृहाणांविभागेनप्रमाणमिहलक्षयेत् ॥ २८७ ॥

जो प्रमाणहो ॥ २८३ ॥ उतना प्रमाण उसके मध्यकी उंचाईका बुद्धिमानोंने कहाहै और समस्त घरोंकी उंचाई द्वादश भागसे न्यून बनवानी ॥ २८४ ॥ पृथिवीके प्रति राजा राजसूय आदि यज्ञोंसे जो परमेश्वरका पूजन करतेहैं उनका उत्तम भवन आठ जिनमें आधेहों ऐसे नलोंसे बनवावै ॥ २८५ ॥ और सात जिनमें आधेहों ऐसे नलोंसे ब्राह्मणोंके घरोंको बनवावै और छः जिनमें आधेहों उनसे क्षत्रियोंका पांच जिनमें आधेहों ऐसे नलोंसे वैश्योंका घर बनवावै ॥ २८६ ॥ और ३ ॥ जिनमें आधे हों ऐसोंसे शूद्रोंका घर बनवाना

कहाहै अपने अपने गृहोंके विभागसे यहां प्रमाण देखना ॥ २८७ ॥ विस्तार और आयाम जो १६ नलोंसे गुननेसे आवै उतना प्रमाण कहाहै जो विषम आवैं तो शुभदायी होतेहैं और सम दुःखदायी होतेहैं ॥ २८८ ॥ और व्याससे सोलमें भागका जो प्रमाण वह सब गृहोंकी मिति (प्रमाण) कहीहै यह उन गृहोंका प्रमाणहै जो पक्की ईटोंके हों काष्ठकी ईटोंके कदाचित नही ॥ २८९ ॥ राजा और सेनापतिके जो घर उसके द्वारका प्रमाण बुद्धिमानोंने १८८ एकसौ अठासी अंगुलका कहाहै ॥ २९० ॥ और ब्राह्मण आदिकोंके द्वारका

विस्तारायामगुणितन्नलैःषोडशभिः स्मृतम् ॥ विषमाः शुभदाह्येतेसमादुःखप्रदायकाः ॥ २८८ ॥ व्यासाच्चषोडशोभागः सर्वेषां मितयः स्मृताः ॥ पक्केष्टकाकृतानाञ्चनदारूणांकदाचन ॥ २८९ ॥ नृपसेनापतिगृहमष्टाशीतिशतैर्युताः ॥ अङ्गुलानिद्वारमानम्प्रवदन्तिमनीषिणः ॥ २९० ॥ विप्रादीनांतथासप्तविंशतिस्त्वंगुलानिच ॥ द्वारस्यमानंतत्प्रोक्तंत्रिगुणोच्छ्रायमुच्यते ॥ २९१ ॥ उच्छ्रायहस्तसंख्यायाः परिमाणान्यंगुलानिच ॥ शाखाद्वयेपिबाहुल्यंकार्यंद्वादशसंयुतम् ॥ २९२ ॥ उच्छ्रायात्सप्तगुणितादशेति पृथुतामता ॥ भागः पुनर्नवगुणाऽशीत्यंशस्ततएवच ॥ २९३ ॥ दशांशहीनस्तस्याग्रः स्तंभानांपरिमाणकम् ॥ वेदास्रोरुचकः स्तंभोवज्रोष्टास्त्रियुतोमतः ॥ २९४ ॥

प्रमाण २७ सत्ताईस अंगुलका कहाहै द्वारका प्रमाण जो कहाहै उससे तिगुनी ऊंचाई शास्त्रमें कहीहै ॥ २९१ ॥ ऊंचाईके हाथोंकी जो संख्या है उतनेही प्रमाणके अंगुल दोनों शाखाओंमें अधिक बनवाने और बारह अंगुल और मिलाने ॥ २९२ ॥ और ऊंचाईसे सात गुनी दशा पृथुता (लम्बाई चौडाई) कहीहै और नौगुणेमें ८० अस्सीमां जो अंश उसै भाग और तत कहतेहैं ॥ २९३ ॥ दशमें अंशसे हीन उसका अग्र कहाहै अब स्तम्भोंके प्रमाणको कहतेहैं जिसमें ४ कोण हो उस स्तम्भको रुचक और जिसमें आठ

कोणहो उसै वज्र कहतेहै ॥ २९४ ॥ और जिसमें १६ कोण हो वह द्विवज्र और जिसमें ३२ बतीस कोणहो उसै प्रलीनक कहतेहैं और जो सम वृत्त (गोल) उसको वृत्त नामका स्तंभ पण्डितोंने कहाहै ॥ २९५ ॥ स्तंभके नौ प्रकार बांटकर उद्वहन घटको बनवाने अर्थात् स्तंभके पासके काष्ठोंको लगावै और पद्म उत्तरौष्ठकोभी भागसे ऊन भागसे बनवाने स्तम्भके नीचेके काष्ठको पद्म उत्तरौष्ठ कहते हैं॥ २९६ ॥ भारकी तुला के ऊपर जिनकी तुलाऊपर हो उनकी स्तंभके समान अधिकता होतीहै और वे एक २ पाद ऊन होतीहै ॥ २९७ ॥ और निषिद्धसे रहित जो अलिंद उसके समान जो घर हैं वह सर्वतोभद्र अर्थात् सब प्रकारसे मांगलिक हो

द्विवज्रः षोडशास्त्रिःस्याद्विगुणास्त्रिः प्रलीनकः ॥ समंतवृत्तोवृत्ताख्यः स्तंभः प्रोक्तोद्विजोत्तमैः ॥ २९५ ॥ विभज्यनवधास्तंभंकुर्यादुद्वहनंघटम् ॥ पद्मंचसोत्तरोष्ठंचकुर्य्याद्भावोनभागतः ॥ २९६ ॥ स्तंभसमंबाहुल्यंभारतुलानामुपर्य्युपरियासाम् ॥ भवति तुलायतुलानामूनंपादेनपादेन ॥ २९७ ॥ अप्रतिषिद्धालिंदंसमंततोवास्तुसर्वतोभद्रम् ॥ नृपविबुधसमूहानांकार्यंद्वारैश्चतुर्भिरपि ॥ २९८ ॥ द्विशालानिगृहाणि ॥ याम्यशालान्यसेदादौद्वितीयापश्चिमेततः ॥ तृतीयाचोत्तरेस्थाप्याचतुर्थीपूर्वपश्चिमा ॥ २९९ ॥ दक्षिणेदुर्मुखंकृत्वापूर्वेचखरसंज्ञकम् ॥ तद्वाताख्यम्भवेद्गेहंवातरोगप्रदंस्मृतम् ॥ ३०० ॥ दक्षिणेदुर्मुखङ्गेहम्पाश्चिमेधान्यसंज्ञकम् ॥ सिद्धार्थाख्यंद्विशालञ्चसर्वसिद्धिकरन्नृणाम् ॥ ३०१ ॥

ताहै राजा और देवताओंके समूहोंका जो घर है वह चार दरवाजोंका बनवाना ॥ २९८ ॥ अब दोशाला आदिके गृहोंको कहतेहैं पहिली शाला दक्षिणमें बनवानी फिर दूसरी पश्चिममें तीसरी उत्तरमें और चौथी पूर्व पश्चिमके मध्यमें बनवानी ॥ २९९ ॥ जिस घरमें दक्षिण दिशामें दुर्मुखका चिह्नहो और पूर्वमें खरका चिह्न हो वह घर वात नामका होताहै और वह वातरोगका प्रदाता शास्त्रमें कहाहै ॥ ३०० ॥ जो घर दक्षिणमें दुर्मुखहो और पश्चिममें धान्यसंज्ञकहो वह दोशालाका घर

सिद्धार्थ नामका होताहै और वह मनुष्योंकी सब सिद्धियोंको करता है ॥ ३०१ ॥ और जो पश्चिममें धान्य नामका हो और उत्तरमें जयसंज्ञकहो और जिसमें दो शालाहों उसे यमसूर्य कहते हैं और वह मृत्यु और नाशका दाता होता है ॥ ३०२ ॥ जो पूर्वमें खरनामका हो और उत्तरमें धान्यसंज्ञकहो और जिसमें दो शाला हों वह दण्डनामका होताहै और वह दण्डको वारम्वार देताहै ॥ ३०३ ॥ और जो दक्षिणमें दुर्मुखहो और उत्तरमें जयसंज्ञक होय और जिसमें दो शालाहों वह वात नामका होताहै उसमें बन्धु और धनका नाश होताहै ॥ ३०४ ॥ जो पूर्वदिशामें खर नामका हो और पश्चिममें धान्यसंज्ञक हो और जिसमें दो शालाहों उस गृहको चुलकी

पश्चिमेधान्यनामानमुत्तरेजयसंज्ञकम् ॥ यमसूर्य्यन्द्विशालन्तन्मृत्युदन्नाशदंस्मृतम् ॥ ३०२ ॥ पूर्वेतुखरनामानमुत्तरेधान्यसंज्ञकम् ॥ दण्डाख्यन्तद्द्विशालंस्याद्दण्डंकुर्य्यात्पुनःपुनः॥३०३॥दुर्मुखन्दक्षिणेकुर्य्यादुत्तरेजयसंज्ञकम् ॥ वाताख्यं तद्द्विशालंतुबन्धुनाशंधनक्षयम् ॥ ३०४ ॥ खरञ्चपूर्वदिग्भागेपश्चिमेधान्यसंज्ञकम्॥गृहञ्चुल्कीद्विशालन्तत्पशुवृद्धिधनप्रदम्॥३०५॥ विपक्षंदक्षिणेभागेपश्चिमेक्रूरसंज्ञकम् ॥ शोभनाख्यंद्विशालन्तद्धनधान्यकरम्परम् ॥ ३०६ ॥ विजयन्दक्षिणेभागेविजयंचैवपश्चिमे ॥ द्विशालञ्चैवकुम्भाख्यंपुत्रदारादिसंयुतम् ॥ ३०७ ॥ धनञ्चपूर्वदिग्भागेधान्यञ्चैवतुपश्चिमे ॥ नन्दाख्यन्तद्द्विशालञ्चधनदंशोभनंस्मृतम् ॥ ३०८ ॥

कहते हैं वह पशुओंकी वृद्धि और धनको देताहै ॥ ३०५ ॥ जो घर दक्षिण भागमें विपक्ष नामका हो और पश्चिममें क्रूरसंज्ञक हो और जिसमें दो शाला हों वह घर शोभन नामका होताहै वह धन और धान्यको देता है ॥ ३०६ ॥ जो दक्षिण भागमें और पश्चिम भागमें विजय नामका हो और जिसमें दो शाला हों उस घरको कुंभ कहते हैं वह पुत्र और स्त्री आदिसे युक्त रहता है ॥३०७॥ जो पूर्वदिशामें धन नामका और पश्चिममें धान्य नामका हो और जिसमें दो शाला हों वह घर नंदनामका होताहै और धनको देताहै और शोभन

नामका होता है ॥ ३०८ ॥ जो सब दिशाओंमें विजय नामका हो और जिसमें दो शाला हों वह शंकनामका होताहै और मनुष्यों
को शुभदायी होताहै ॥ ३०९ ॥ जो सब दिशाओंमें विपुल हो और जिनमें दो शालाहों उस घरको संपुट नामक कहते हैं और धनधा
न्यको देताहै ॥३१०॥ जो सब दिशाओंमें धनद हो वा सुवक्र वा मनोरम हो वह घर कान्त नामका होताहै और वह सब घरोंमें शोभन
कहाहै ॥ ३११॥ दो शालाओंके घरोंके ये १३ भेद इन गृहोंके फलपाकके लिये मैंने विस्तारसे कहे ॥ ३१२ ॥ पूर्वदक्षिण १ दक्षिणपश्चिम

विजयंसर्वदिग्भागेद्विशालाख्यन्तदेवहि ॥ शङ्खाख्यन्नामतद्गेहंशुभदश्चनृणांभवेत्॥३०९॥विपुलंसर्वदिग्भागेद्विशालन्तत्प्रजायते॥तानि
संपुटसंज्ञानिधनधान्यप्रदानिच ॥ ३१० ॥ धनदंसर्वदिग्भागेसुवक्रंवामनोरमम् ॥ कान्तंनामतुतद्गेहंसर्वेषांशोभनंस्मृतम् ॥ ३११ ॥
द्विशालानान्तद्गृहाणांभेदाश्चैवत्रयोदश ॥ फलपाकार्थमेतेषाम्मयाप्रोक्तंसुविस्तरात् ॥ ३१२ ॥ पूर्वयाम्यमथयाम्यपश्चिमंपश्चिमो
त्तरमथोत्तरपूर्वकम् ॥ प्राक्प्रतीचमथदक्षिणोत्तरंवास्तुषड्विधमिदंद्विशालकम् ॥ ३१३ ॥ अथत्रिशालानि ॥ उत्तरद्वारहीनंयत्त्रिशाल
न्धनधान्यदम् ॥ हिरण्यनाभनामानंराज्ञांसौख्यविवर्द्धनम् ॥ ३१४ ॥ प्राग्द्वारशालहीनन्तुसुक्षेत्रन्नामतद्गृहम् ॥ वृद्धिदंपुत्रपौत्राणा
न्धनधान्यसमृद्धिदम् ॥ ३१५ ॥ याम्यशालाविहीनन्तात्रिशालंचुल्हिसंज्ञकम् ॥ विनाशनंधनस्यापिपुत्रपौत्रादिनाशनम् ॥ ३१६ ॥

२ पश्चिमउत्तर ३ उत्तरपूर्व ४ प्राक्पश्चिम ५ और दक्षिण उत्तर ६ इन भेदोंसे दो शालाका वास्तु छः प्रकारका होता है ॥ ३१३ ॥ इसके
अनन्तर तीन शालाओंके वास्तुको कहते हैं, उत्तरके द्वारसे जो रहितहो ऐसा तीन शालाका गृह हिरण्यनाभि नामका होता है वह धन
धान्यको देताहै और राजाओंके सुखको बढाता है ॥३१४॥ और जिसमें पूर्वके द्वारकी शाला नहो वह गृह सुक्षेत्र नामका होताहै और
पुत्र पौत्रोंकी वृद्धि और धन धान्यकी समृद्धिको देता है ॥ ३१५ ॥ और दक्षिणकी शालासे जो रहितहो और जिसमें तीन शालाहों

ऐसे घरको चुलही कहतेहैं उसमें धन और पुत्र पौत्र आदिका नाश होता है ॥ ३१६ ॥ जो घर पश्चिमकी शालासे रहितहो उस घरको पक्षघ्न कहतेहैं वह पुत्रोंको दोषका दाता और पुरवासीयोंकी शत्रुताको देता है ॥ ३१७ ॥ तीन शालाके गृहोंके ये चार भेद मैंने कहे इस से घरके कर्ममें बुद्धिमान् मनुष्य इनका विचारकर घरको बनवावै ॥ ३१८ ॥ इसके अनन्तर चार शालाओंके घरोंको कहते हैं-जिस घर में चारों तरफ अलिंदोंका स्थापन नहो और जिसमें चार द्वारहों उस वास्तुको सर्वतोभद्र कहते हैं और एक ग्राममें चार शालाके घरमें

प्रत्यक्छालाविहीनन्तुपक्षघ्नंनामतद्गृहम् ॥ पुत्राणान्दोषदश्चैवपरञ्चपुरवासिनाम् ॥ ३१७ ॥ चत्वारोमीमयाप्रोक्ताभेदाश्चैवचतुर्दश ॥ तस्माद्विचार्यकुर्वीतगृहकर्मणिकोविदः ॥ ३१८॥ अथचतुःशालानि ॥ अलिन्दानांह्यवच्छेदोनास्तियत्रसमन्ततः ॥ तद्वास्तुसर्वतोभद्रं चतुर्द्वारसमन्वितम् ॥ एकग्रामेचतुःशालेदुर्भिक्षेराज्यविप्लवे ॥ ३१९ ॥ स्वामिनोनीयमानायाम्प्रतिशुक्रन्नदुष्यति ॥ नृपा णांविबुधानाञ्चगृहंसौख्यप्रदायकम् ॥ ३२० ॥ प्रदक्षिणान्तगैःसर्वैः शालाभित्तिरलिन्दकैः ॥ विनापरेणद्वारेणनन्द्यावर्तमितिस्मृतम् ॥ ३२१ ॥ श्रेष्ठंसुतारोग्यकरंसर्वेषांशुद्धजन्मनाम् ॥ द्वारालिन्दोगतस्त्वेकोनेत्रयोर्दक्षिणागतः ॥ ३२२ ॥ विहायदक्षिणद्वारंवर्द्ध मानमितिस्मृतम् ॥ शुभदंसर्ववर्णानांवृद्धिदंपुत्रपौत्रदम् ॥ ३२३ ॥

दुर्भिक्ष राज्यके उपद्रवमें ॥ ३१९ ॥ यदि स्वामी अपनी स्त्रीको संग शुक्रास्तमें लेजाय तो सन्मुख शुक्रका दोष नहीं. राजा और देवताओंका जो घरहै वह सुखदायी होताहै ॥ ३२० ॥ जिसकी प्रदक्षिणाके अन्तमें सबतरफ शाला भींत अलिंद हों और पश्चिमका द्वार न हो उस घरको नन्द्यावर्त कहतेहैं ॥ ३२१ ॥ वह शुद्ध जन्मवाले श्रेष्ठ पुरुषोंको सुख और आरोग्यका दाता और श्रेष्ठ कहाहै और जिसकी दक्षिण दिशामें एक द्वारका अलिन्द नेत्रभागमें हो ॥ ३२२ ॥ और दक्षिणमें द्वार नहो उस घरको वर्द्धमान

कहतेहैं वह सब वर्णोंको शुभदायी वृद्धि पुत्र पौत्रोंको देताहै ॥३२३॥ जिसके पश्चिम और उत्तरमें अलिंदहो और पूर्वदिशापर्यन्त दोअलिंद उठे हुएहो और उनके मध्यमें एक अलिंदहो और पूर्वको जिसका द्वारहो उसघरको स्वस्तिक और सुखदायी कहतेहैं ॥ ३२४ ॥ जिस घरमें पूर्व और पश्चिममें दो अलिंद हो और गृहके अन्ततक दो अलिंदहो और उत्तरको जिसका द्वार नहो उस घरको रुचक नामका कहतेहैं ॥ ३२५ ॥ ॥ इति वास्तुशास्त्रे समगृहादिनिर्माणे पं० मिहिरचंद्रकृतभाषाविवृतिसहिते द्वितीयोऽध्यायः ॥ २ ॥ इससे

पश्चिमोत्तरतोलिन्दः प्रागन्तौद्वौतदुत्थितौ ॥ अन्यस्तन्मध्यविधृतः प्राग्द्वारंस्वस्तिकंशुभम् ॥ ३२४ ॥ प्राक्पश्चिमावलिन्दौयावंतगौ तद्द्वौपरौ ॥ सौम्यद्वारंविनातुस्याद्रुचकाख्यन्तुतत्स्मृतम् ॥ ३२५ ॥ इतिवास्तुशास्त्रेसमगृहादिनिर्म्माणेद्वितीयोऽध्यायः ॥ २ ॥

अथातःसम्प्रवक्ष्यामिगृहकालविनिर्णयम् ॥ यथाकालंशुभंज्ञात्वातदाभवनमारभेत् ॥ ३२६ ॥ मृदुध्रुवस्वातिपुष्यधनिष्ठाद्वितयेरवौ ॥ मूलेपुनर्वसौसौम्यवारेप्रारंभणंशुभम् ॥ ३२७ ॥ आदित्यभौमवर्जन्तुवाराः सर्वेशुभावहाः ॥ द्वितीयाचतृतीयाचषष्ठीचपञ्चमीतथा ॥ ३२८ ॥ सप्तमीदशमीचैवद्वादश्येकादशीतथा ॥ त्रयोदशीपञ्चदशीतिथयःस्युः शुभावहाः ॥ ३२९ ॥ दारिद्र्यम्प्रतिपत्कुर्या च्चतुर्थीधनहारिणी ॥ अष्टम्युच्चाटनञ्चैवनवमीशस्त्रघातिनी ॥ ३३० ॥

आगे कालका निर्णय कहतेहैं- कालके अनुसार शुभ मुहूर्तको जानकर भवनका प्रारंभ करै ॥ ३२६ ॥ मृदु (मृ० रे० चि० अ०) ध्रुव (उ० ३ रो०) स्वाति धनिष्ठा श्रवण मूल पुनर्वसु इनपर सूर्यहो और सौम्यवार होय तो गृहका प्रारंभ श्रेष्ठ होताहै ॥ ३२७ ॥ आदित्य भौमको छोडकर समस्त वार शुभदायी होतेहैं और । २ । ३ । ६ । और । ५ । पंचमी ॥ ३२८ ॥ ७ । १० । १२ । ११ । १३ । और पूर्णिमा १५ ये तिथि शुभदायी कहीहैं ॥ ३२९ ॥ प्रतिपदा दारिद्र्यको करतीहैं और अष्टमी उच्चाटन करतीहै और नवमी

शस्त्रोंसे घात करातीहै ॥ ३३० ॥ अमावस्याको राजसे भय चतुर्दशीको पुत्र और दाराका नाश होताहै धनिष्ठा आदि
पांच । ५ । नक्षत्रोंमें स्तंभका स्थापन नकरै ॥ ३३१ ॥ और सूत्रधार शिलाका स्थापन और प्रन्कार आदिको करले दोप्रकारका
यामित्र वेध उपग्रह और कर्तरी योग येभी वर्जने योग्यहैं ॥ ३३२ ॥ एकार्गल लत्ता युति और क्रकच योग दो प्रकारका पात
वैधृति येभी वर्जितहैं ॥ ३३३ ॥ कुलिक कंटक काल और यमघंट और जन्मसे तीसरा पांचमां और छठा तारा और नक्षत्र

दर्शेराजभयम्भूतेसुतदारविनाशनम् ॥ धनिष्ठापञ्चकेनैवकुर्यात्स्तंभसमुच्छ्रयम् ॥ ३३१ ॥ सूत्रधारशिलान्यासंप्राकारादिसमाल
भेत् ॥ यामित्रंद्विविधंवर्ज्यंवेधोपग्रहकर्त्तरि ॥ ३३२ ॥ एकार्गलन्तथालत्तायुतिक्रकचसंज्ञकाः ॥ पातन्तुद्विविधंवर्ज्यंव्यतीपातश्च
वैधृतिः ॥ ३३३ ॥ कुलिकङ्कटकङ्कालंयमघण्टन्तथैवच ॥ जन्मतृतीयपञ्चाङ्गतारावर्ज्यानिभानिच ॥ ३३४ ॥ कुयोगावनसं
ज्ञश्चतथात्रिस्पृक्खलन्दिनम् ॥ पापलग्नानिपापांशाः पापवर्गास्तथैवच ॥ ३३५ ॥ कुयोगास्तिथिवारोत्थास्तिथिभोत्थाभवारजाः ॥
विवाहादिषुयेवर्ज्यास्तेवर्ज्यावास्तुकर्मणि ॥ ३३६ ॥ वास्तुचक्रंप्रवक्ष्यामियच्चव्यासेनभाषितम् ॥ यस्मिन्नृक्षेस्थितोभानुस्तदादौ
त्रीणिमस्तके ॥ ३३७ ॥ चतुष्कमग्रपादेस्यात्पुनश्चत्वारिपाश्चिमे ॥ पृष्ठेचत्रीणिऋक्षाणिदक्षकुक्षौचतुष्ककम् ॥ पुच्छेचत्वारिऋक्षा
णिकुक्षौचत्वारिवामतः ॥ ३३८ ॥

वर्जितहैं ॥ ३३४ ॥ कुयोग और वनसंज्ञक योग और तीन तिथियोंका जिसमें स्पर्शहो ऐसा दुष्टदिन पाप लग्न और पापका नवांश
और पापग्रहोंका वर्गयेभी वर्जितहैं ॥ ३३५ ॥ तिथि वारके कुयोग और तिथि नक्षत्रके कुयोग और तिथि वारका कुयोग जो
विवाह आदिमें वर्जितहैं वे वास्तुकर्ममें भी वर्जितहैं ॥ ३३६ ॥ उस वास्तुचक्रको कहताहूं- जो व्यासने कहाहै जिस नक्षत्र
पर सूर्य होय उससे लेकर तीन नक्षत्र मस्तकपर रक्खै ॥ ३३७ ॥ चार नक्षत्र अग्रपाद और चार नक्षत्र पश्चिम पादमें और तीन नक्षत्र

पीठपर और चार नक्षत्र दाहिनी कुक्षिमें और चार नक्षत्र पूंछपर और चार नक्षत्र वाम कुक्षिमें रक्खै ॥ ३३८ ॥ और तीन नक्षत्र मुखपर होतेहैं. इस प्रकार अठाईस तारा होतेहैं शिरका तारा अग्निका दाह करताहै अग्रपादमें गृहसे उद्वास (निकसना) ॥ ३३९ ॥ पश्चिम पादके नक्षत्रोंमें स्थिरता और पीठके नक्षत्रोंमें धनका आगम और दक्षिण कुक्षिके नक्षत्रमें लाभ और पुच्छके नक्षत्रोंमें स्वामीका नाश होताहै ॥ ३४० ॥ वाम कुक्षिके नक्षत्रमें दरिद्रता और मुखके नक्षत्रोंमें निरंतर पीडा होतीहै और पुनर्वसु नक्षत्रोंमें राजा आदिके सूतिकागृहको बनवावै ॥ ३४१ ॥ श्रवण और अभिजित् नक्षत्रोंमें सूतिकागृहमें प्रवेश

मुखेभत्रयमेवस्युरष्टाविंशतितारकाः ॥ शिरस्ताराग्निदाहायगृहोद्वासोग्रपादयोः ॥ ३३९ ॥ स्थैर्य्यंस्यात्पश्चिमेपादेपृष्ठेचैवंधनागमः ॥ कुक्षौस्याद्दक्षिणेलाभः पुच्छेचस्वामिनाशनम् ॥ ३४० ॥ वामकुक्षौचदारिद्र्यम्मुखेपीडानिरन्तरम् ॥ पुनर्वसौनृपादीनाङ्कर्तव्यंसूतिकागृहम् ॥ ३४१ ॥ श्रवणाभिजितोर्मध्येप्रवेशन्तत्रकारयेत् ॥ चरलग्नेचरांशेचसर्वथापरिवर्जयेत् ॥ ३४२ ॥ जन्मभाच्चोपचयभेलग्नेवर्गेतथैवच ॥ प्रारम्भणंप्रकुर्वीतनैधनंपरिवर्जयेत् ॥ ३४३ ॥ पापैस्त्रिषष्ठायगतैः सौम्यैः केन्द्रत्रिकोणगैः ॥ निर्माणङ्कारयेद्धीमानष्टमस्थैः खलैर्मृतिः ॥ ३४४ ॥ मनुष्यलग्नेसौम्यानान्दृग्योगेयोगतस्तथा ॥ कुम्भंविहायान्यतरेलग्नेसौम्यग्रहान्विते ॥ ३४५ ॥

करवावै और चर लग्न और चरलग्नके नवांशको सर्वथा वर्जदे ॥ ३४२ ॥ जन्मकी राशिसे उपचय (वृद्धि) का लग्न और उपचयकी राशिमें प्रारंभ करै और जन्मलग्नसे आठमें लग्नको वर्जदे ॥ ३४३ ॥ पापग्रह । ३ । ६ । ११ । में सौम्य ग्रह केन्द्र (१ । ४ । ७ । १०) और त्रिकोण (९ । ५ ।) मेंहो ऐसे लग्नमें बुद्धिमान् मनुष्य गृहको बनवावै और अष्टम लग्नमें पापग्रह होंय तो मरण होताहै ॥ ३४४ ॥ मनुष्यलग्न होय और सौम्यग्रहोंकी दृष्टिका योग होय तो कुंभसे भिन्न किसी सौम्यग्रहसे युक्त लग्नमें ॥ ४४५ ॥

52

जलाशय आदि वास्तुओंका प्रारंभ शुभदायी कहाहै ॥ ३४६ ॥ इसके अनंतर योगोंका वर्णन करतेहैं कि गुरु लग्नमें हो सूर्य छठे हो और सौम्यग्रह द्यून ७ में हो शुक्र सुख (४) में हो तीसरे शनैश्चर हो ऐसे लग्नमें बनाया जो घर उसकी सौ १०० वर्षकी अवस्था होतीहै ॥ ३४७ ॥ शुक्र लग्नमें हो और दशमें सौम्यग्रह हो सूर्य लाभ ११ । स्थानमें हो गुरु केन्द्र में होय तो उस लग्नमें बनाया मंदिर सौ १०० वर्ष टिकताहै ॥ ३४८ ॥ चौथे गुरु हो १० दशमें चंद्रमा हो लाभमें मंगल और सूर्य हो ऐसे लग्नमें जिसका प्रारंभ किया जाय उसकी ८० अस्सी वर्षकी अवस्था होतीहै ॥ ३४९ ॥ लग्नमें शुक्र हो पंचममें गुरु हो छठे ६ मंगल हो

जलाशयादिवास्तूनांप्रारम्भःशुभदः स्मृतः ॥ ३४६ ॥ अथयोगाः ॥ गुरुर्लग्नेरविःषष्ठेद्यूनेसौम्येसुखेसिते ॥ तृतीयस्थेर्कपुत्रेचतद्गृहंशतमायुषम् ॥ ३४७ ॥ भृगुर्लग्नेंबरेसौम्येलाभस्थानेचभास्करे ॥ गुरुः केन्द्रगतोयत्रशतवर्षाणितिष्ठति ॥ ३४८ ॥ हिबुकेज्येंबरेचन्द्रेलाभेचकुजभास्करौ ॥ आरंभः क्रियतेयस्यअशीत्यायुः क्रमाद्भवेत् ॥ ३४९ ॥ लग्नेभृगौपुत्रगेज्येषष्ठेभौमेतृतीयगे ॥ रवौयस्यगृहारम्भेसचतिष्ठेच्छतद्वयम् ॥ ३५० ॥ लग्नस्थौगुरुशुक्रौचारिपुराशिगतेकुजे ॥ सूर्य्येलाभगतेयस्यद्विशताब्दानितिष्ठति ॥ ३५१ ॥ स्वोच्चस्थोवाभृगुर्लग्नेस्वोच्चेजीवेसुखस्थिते ॥ स्वोच्चेलाभगतेमंदेसहस्राणांसमास्थितिः ॥ ३५२ ॥ स्वोच्चेस्वभवनेसौम्यैर्लग्नस्थैर्वापिकेन्द्रगैः ॥ प्रारम्भः क्रियतेयस्यशतद्वयंसतिष्ठति ॥ ३५३ ॥

तीसरे सूर्य हो ऐसे लग्नमें जिस घरका आरंभ वह २०० वर्षतक टिकताहै ॥ ३५० ॥ लग्नमें गुरु शुक्र स्थित हों और छठी राशिपर मंगल हो और सूर्य लाभमें हो ऐसे लग्नमें बनायाहुआ घर २०० वर्षतक टिकताहै ॥ ३५१ ॥ अपने उच्चका शुक्र लग्नमें हो और अपने उच्चका बृहस्पति सुख ४ में हो और अपने उच्चका सूर्य लाभमें हो ऐसे लग्नमें जिस घरका आरंभ किया जाय ऐसा घर हजार १००० वर्षतक टिकताहै ॥ ३५२ ॥ अपने उच्चके वा अपने अपने गृहके वा लग्नमें स्थित अथवा केंद्रमें

स्थित सौम्य ग्रह हो ऐसे लग्नमें जिसका प्रारंभ हो वह गृह सौवर्षतक टिकताहै ॥ ३९३ ॥ कर्कलग्नमें चंद्रमा और केन्द्रमें बृह
स्पति और मित्रगृह वा अपने उच्चके अन्य ग्रह होय तो उस घरमें चिरकालतक लक्ष्मी होती है ॥ ३९४ ॥ पुष्य तीनों उत्तरा श्लेषा मृगशि
र श्रवण रोहिणी और जलके नक्षत्र शतभिषा इनमें बनाया हुआ घर लक्ष्मीसे युक्त होताहै ॥ ३९५ ॥ विशाखा चित्रा शतभिषा आर्द्रा
पुनर्वसु धनिष्ठा और शुक्रवार सहित इन नक्षत्रोंमें बनायाहुआ घर अन्नको देताहै ॥ ३९६ ॥ हस्त मघा चित्रा अश्विनी और अनुरा
धा बुधवार सहित इन नक्षत्रोंमें बनाया घर धन पुत्र और सुखदायी होताहै ॥ ३९७ ॥ अब कुयोगोंका वर्णन करतेहैं कि-छठेस्थानमें

कर्कलग्नगतेचन्द्रेकेन्द्रस्थानेचवाक्पतिः ॥ मित्रस्वोच्चस्थितैः खेटैर्लक्ष्मीस्तस्यचिरम्भवेत् ॥ ३९४ ॥ इज्योत्तरात्रयाहीन्दुविष्णु
धातृजलोडुषु ॥ वरुणासहितेष्वेषुकृतङ्गेहंश्रियायुतम् ॥ ३९५ ॥ द्विदैवत्वाष्ट्रवारीशरुद्रादितिवसूडुषु ॥ शुक्रेणसहितेष्वेषुकृ
तन्धान्यप्रदंगृहम् ॥ ३९६ ॥ हस्तार्यमत्वाष्ट्रदस्रचानुराधोडुभेषुच ॥ बुधेनसहितेष्वेषुधनपुत्रसुखप्रदम् ॥ ३९७ ॥ कुयोगाः ॥
शत्रुक्षेत्रगतैः खेटैर्नीचस्थैर्वापराजितैः ॥ प्रारम्भेयस्यभवनेलक्ष्मीस्तस्यविनश्यति ॥ ३९८ ॥ एकोपिपरभागस्थोदशमेसप्तमेपिवा ॥
वर्णाधिपेबलैर्हीनेतद्गृहम्परहस्तगम् ॥ ३९९ ॥ पापान्तरगतेलग्नेनचसौम्ययुतेक्षिते ॥ अष्टमस्थेऽर्कपुत्रेचअशीत्यब्दाद्विहन्यते॥३६०॥
मन्देलग्नगतेचैवकुजेसप्तमसंस्थिते ॥ शुभैरवीक्षितेवापिशतवर्षाणिहन्यते ॥ ३६१ ॥

ऐसे ग्रह पडे होय जो नीचके हो वा पराजितहो ऐसे लग्नमें जिस गृहका प्रारंभहो उसमें लक्ष्मीका नाश होताहै ॥ ३९८॥ जिस लग्नमें एकभी
गृह परभागमें स्थितहो वा दशम सप्तममें स्थितहो और वर्णका स्वामी बलसे हीनहो तो वह घर परहस्तगामी होजाताहै ॥३९९॥ पापगृहों
के अन्तर्गत लग्न हो और सौम्य ग्रहोंसे युक्त और दृष्ट नहो और अष्टम स्थानमें शनैश्चर होय तो वह घर अस्सी वर्षके मध्यमें
नष्ट होजाताहै ॥ ३६० ॥ शनैश्चर लग्नमें स्थितहो और मंगल ७ सप्तमभवनमें और लग्नमें शुभग्रहोंकी दृष्टि नहोय तो वह घर सौ १००

वर्षमें नष्ट होजाताहै ॥३६१॥क्षीण चंद्रमा लग्नमें हो और अष्टम स्थानमें मंगलहो ऐसे लग्नमें जिसका प्रारंभ हो वह घर शीघ्र नष्ट होजाताहै ॥ ३६२ ॥ दशाका पति और वर्णका नाथ बलसे हीनहो और पीडितनक्षत्रपर सूर्य हो ऐसे लग्नमें कदाचित घरको न बनवावै ॥ ३६३ ॥ मघा मूल पुष्य भाग्य (पूर्वाफा०)रेवती इनमें बनाया हुआ घर ॥ ३६४ ॥ और मंगल सहित इनमें बनाया घर अग्निसे भस्म होजाताहै ॥ ३६५ ॥ मूल रेवती कृत्तिका पूर्वाषाढा पूर्वाफाल्गुनी हस्त और सातमां मघा ॥ ३६६ ॥ मंगलसे युक्त इन नक्षत्रोंमें और मंगलवारमें

लग्नगेशशिनिक्षीणेमृत्युस्थानेचभूसुते ॥ प्रारम्भः क्रियतेयस्यशीघ्रन्तद्धिविनश्यति ॥ ३६२ ॥ दशायतौबलैर्हीनेवर्णनाथेतथैवच ॥ पीडितर्क्षगतेसूर्येनविदध्यात्कदाचन ॥ ३६३ ॥ पितृमूलयेज्यभाग्यार्कपौष्णभेषुचयत्कृतम् ॥ ३६४ ॥ कुजेनसहितेष्वेषुगृहं सन्दह्यतेग्निना ॥ ३६५ ॥ मूलञ्चरेवतीचैवकृत्तिकाषाढमेवच ॥ पूर्वाफाल्गुनिहस्तेचमघाचैवतुसप्तकम् ॥ ३६६ ॥ एषुभौमेन युक्तेषुवारेतस्यैववेश्मयत् ॥ अग्निनादह्यतेकृत्स्नंपुत्रनाशःप्रजायते ॥ ३६७ ॥ अग्निनक्षत्रगेसूर्येचन्द्रेवातत्रसंस्थिते ॥ निर्मितम्मन्दिर न्नूनमग्निनादह्यतेचिरात् ॥ ३६८ ॥ ज्येष्ठानुराधकेचैवभरणीस्वातिपूर्वभे ॥ धनिष्ठास्वपिऋक्षेषुशनिस्तिष्ठेद्दिनस्यच ॥ ३६९ ॥ कृपणोनामतः प्रोक्तोधनधान्यादिकेगृहे ॥ पुत्रेजातेथवातस्मिन्गृह्यतेयक्षराक्षसैः ॥ ३७० ॥

जो घर बनाया जाताहै वह संपूर्ण अग्निसे दग्ध होताहै और उसमें पुत्र नष्ट होजाताहै ॥ ३६७ ॥ अग्निके नक्षत्रमें सूर्य वा चंद्रमा स्थितहो य तो ऐसे लग्नमें बनायाहुआ मंदिर थोडे दिनोंमें निश्चयसे दग्ध अग्निसे होताहै ॥ ३६८ ॥ ज्येष्ठा अनुराधा भरणि स्वाती पूर्वा तीनों और धनिष्ठा इन नक्षत्रोंमें और शनैश्चरके दिन-बनाया मंदिर ॥ ३६९ ॥ नामसे कृपण कहाताहै और धन धान्यसहितभी उस घरमें उत्पन्न

हुआ पुत्र यक्ष और राक्षसोंसे ग्रहण कियाजाताहै ॥ ३७० ॥ प्रासादोंमें वापी कूप आदिमें भी यही फल होताहै तिससे शुभका अभिला
षी मनुष्य विचारकर घरका आरंभ करै ॥ ३७१ ॥ मकर वृश्चिक कर्क लग्नमें गृहका आरंभ होय, तो नाश हो मेष तुल धन लग्नमें होय तो
काममें दीर्घसूत्रीको कन्या मीन मिथुनमें होयतो निश्चयसे अर्थके लाभको कुंभ सिंह और वृषमें सिद्धिको ऐसे ज्योतिःशास्त्रके ज्ञाता वर्ण
न करतेहैं ॥ ३७२ ॥ मध्याह्नमें कियाहुआ वास्तु कर्ता और धनके नाशको देताहै अर्द्धरात्रिमें भी तैसाही फलहै और संध्यामेंभी गृहके
आरंभको न करै ॥ ३७३ ॥ इसके अनंतर भावोंके फलको कहतेहैं–लग्नमें सूर्य होय तो वज्रका पात चंद्रमा होय तो कोशकी हानि मंगल

प्रासादेष्वेवमेवंस्याद्वापीकूपेषुचैवहि ॥ तस्माद्विचार्यकुर्वीतगृहारंभंशुभेप्सुना ॥ ३७१ ॥ नाशन्दिशंतिमकरालिकुलीरलग्नेमेषे
घटेधनुषिकर्मसुदीर्घसूत्रम् ॥ कन्याझषेमिथुनगेध्रुवमर्थलाभंज्योतिर्विदः कलशसिंहवृषेषुसिद्धिम् ॥ ३७२ ॥ मध्याह्नेतुकृतंवास्तुकर्त्तु
र्वित्तविनाशनम् ॥ महानिशास्वपितथासन्ध्ययोर्नैवकारयेत् ॥ ३७३ ॥ अथभावफलानि ॥ लग्नेऽर्केवज्रपातः स्यात्कोशहानिश्चशी
तगौ ॥ मृत्युर्विश्वम्भरापुत्रेदारिद्र्यंरविनन्दने ॥ ३७४ ॥ जीवेधर्मार्थकामाः स्युः पुत्रोत्पत्तिश्चभार्गवे ॥ चन्द्रजेकुशलाशक्तिर्या
वदायुः प्रवर्त्तते ॥ ३७५ ॥ द्वितीयस्थेरवौहानिश्चन्द्रेशत्रुक्षयंभवेत् ॥ भूमिजेबन्धनम्प्रोक्तंनानाविघ्नानिभानुजे ॥ ३७६ ॥
बुधेद्रविणसंपत्तिर्गुरौधर्माभिवर्द्धनम् ॥ यथाकामविनोदेनभृगौकामंव्रजेत्फलम् ॥ ३७७ ॥ तृतीयस्थेषुपापेषुसौम्येष्वेवविशेषतः ॥
सिद्धिः स्यादचिरादेवयथाभिलषितम्प्राति ॥ ३७८ ॥

होय तो मृत्यु शनैश्चर लग्नमें होय तो दारिद्र्य होताहै ॥ ३७४ ॥ बृहस्पति होय तो धर्म अर्थ काम, शुक्र होय तो पुत्रोंकी उत्पत्ति बुध
होय तो जन्मभर अच्छे कर्मोंमें प्रवृत्ति होती है ॥ ३७५ ॥ दूसरे स्थानमें सूर्य होय तो हानि चंद्रमा होय तो शत्रुओंका नाश मंगल होय
तो बन्धन और शनैश्चर होय तो नानाप्रकारके विघ्न होतेहैं ॥ ३७६ ॥ बुध होय तो धनकी सम्पत्ति बृहस्पति होय तो धर्मकी वृद्धि और
शुक्र होय तो यथेच्छ आनंदसे फलोंकी कामना सिद्ध होतीहैं ॥ ३७७ ॥ तीसरे स्थानमें पापग्रह होय और विशेषकर सौम्यग्रह होय तो

अलपकालमेंही अपनी इच्छालुसार सिद्धि होतीहै ॥ ३७८ ॥ चौथेस्थानमें बृहस्पति होय तो राजासे पूजा प्राप्त होती है, बुध होय तो धनका लाभ और शुक्र होय तो भूमिका लाभ होताहै ॥ ३७९ ॥ सूर्य होय तो मित्रका वियोग मंगल होय तो मंत्रका भेद चंद्रमा होय तो बुद्धिका नाश और शनैश्चर होय तो सबका नाश होताहै ॥ ३८० ॥ पंचममें बृहस्पति होय तो मित्र और अन्न धनका आगमन होताहै शुक्र होय तो पुत्र और सुखकी प्राप्ति बुध होय तो रत्नोंका लाभ होताहै ॥ ३८१ ॥ सूर्य होय तो पुत्रोंका दुःख चंद्रमा होयतो कलह कहाहै. मंगल होय तो कार्यका विरोध शनैश्चर होय तो बंधुओंमें लड़ाई होतीहै ॥ ३८२ ॥ छठे स्थानमें सूर्य होय

चतुर्थस्थानगेजीवेपूजासंपद्यतेनृपात् ॥ चन्द्रजेचार्थलाभः स्याद्भूमिलाभश्चभार्गवे ॥३७९॥ वियोगः सुहृदांभानौमन्त्रभेदोमहीसुते ॥ बुद्धिनाशोनिशानाथेसर्वनाशोर्कनन्दने ॥ ३८० ॥ पंचमेतुसुराचार्येमित्रंवसुधनागमः ॥ शुक्रेपुत्रसुखावाप्तीरत्नलाभस्तथेन्दुजे॥३८१॥ सुतदुःखंसहस्रांशौशशाङ्केकलहः स्मृतः ॥ भौमेकार्यविरोधःस्यात्सौरेबन्धुविमर्दनम् ॥ ३८२ ॥ षष्ठस्थानगतेसूर्य्येरोगनाशंम्विनिर्दिशेत् ॥ चन्द्रेपुष्टिः कुजेप्राप्तिः सौरेशत्रुबलक्षयः ॥३८३॥ गुरौमन्त्रोदयः प्रोक्तोभृगौविद्यागमोभवेत् ॥ सम्यग्ज्ञानार्थकौशल्यन्नक्षत्रपतिनन्दने ॥ ३८४ ॥ सप्तमस्थानगेजीवेबुधेदैत्यपुरोहिते ॥ गजवाजिधरित्रीणाक्रमल्लाभंविनिर्दिशेत् ॥ ३८५ ॥ भास्करेकीर्तिभङ्गः स्यात्कुजेविपदमादिशेत् ॥ हिमगौक्लेशआयासः पतङ्गव्यङ्गताभयम् ॥ ३८६ ॥

तो रोगके नाशको कहै चंद्रमा होयतो पुष्टि मंगल होय तो प्राप्ति शनैश्चर होयतो शत्रुओंके बलका क्षय होताहै ॥ ३८३ ॥ बृहस्पति होय तो मंत्रका उदय कहाहै शुक्र होय तो विद्याका आगम कहाहै और बुध होय तो भलीप्रकार ज्ञान और अर्थमें कुशलता होतीहै ॥ ३८४ ॥ सातमें स्थानमें बृहस्पति बुध और शुक्र होय तो क्रमसे गज वाजी और पृथिवीके लाभको कहे ॥ ३८५ ॥ सूर्य होय तो कीर्तिका नाश होताहै मंगल होयतो विपत्तियोंको कहै चंद्रमा होय तो क्लेश और परिश्रम होताहै

सूर्य होय तो अंगहीनता और भय होताहै ॥ ३८६ ॥ अष्टमस्थानमें सूर्य होय तो वैरियोंसे दुःख होताहै चंद्रमा होय तो हानि मंगल शनैश्चर होंय तो रोगका भय होताहै ॥ ३८७ ॥ बुध होय तो मान और धनकी प्राप्ति बृहस्पति होय तो विजय होताहै शुक्र होयतो मंत्रके ज्ञाताभी मनुष्यके यहां अपने जनोंसे भेद होताहै ॥ ३८८ ॥ बृहस्पति नवमस्थानमें होय तो विद्या भोग आदिका आनंद होताहै बुध होय तो अनेक प्रकारके भोग और शुक्र होय तो विजय होताहै ॥ ३८९ ॥ चंद्रमा होय तो धातुओंका नाश कहाहै सूर्य होय तो धर्मकी हानि मंगल होय तो धनका नाश शनैश्चर होय तो धर्ममें दूषण होता

नैधनेचसहस्रांशौविद्विषोजनितःपदः ॥ हानिः शीतमयूखेचभौमेसौरेचरुग्भयम् ॥ ३८७ ॥ बुधेमानधनप्राप्तिर्जीवेचविजयोभवेत् ॥ शुक्रेस्वजनभेदः स्यान्मंत्रज्ञस्यापिदेहिनः ॥ ३८८ ॥ वागीशेनवमस्थानेविद्याभोगादिनन्दनम् ॥ बुधेविविधभोगाश्चजीवेचविजयो भवेत् ॥ ३८९ ॥ चन्द्रेधातुक्षयः प्रोक्तोधर्महानिश्चभास्करे ॥ कुजेचार्थक्षयोविद्याद्रविजेधर्मदूषणम् ॥ ३९० ॥ दशमस्थानगेशुक्रे शयनासनसिद्धयः ॥ सुराचार्येमहत्सौख्यंविजयंस्त्रीधनम्बुधे ॥ ३९१ ॥ मार्तण्डेवसुहृद्वृद्धिश्चन्द्रेशोकविवर्द्धनम् ॥ भौमेरत्नागमः प्रोक्तः कोणेकीर्तिविलोपनम् ॥ ३९२ ॥ लाभस्थानेषुसर्वेषुलाभस्थानंविनिर्दिशेत् ॥ व्ययस्थानेषुसर्वेषुविनिर्देश्योव्ययः सदा ॥ ३९३ ॥ स्वोच्चेपूर्णफलः प्रोक्तः पादोनंस्वर्क्षगोग्रहः ॥ स्वत्रिकोणेर्द्धफलदः पादम्मित्रगृहाश्रितः ॥ ३९४ ॥

है ॥ ३९० ॥ दशमें स्थानमें शुक्र होय तो शयन आसनकी सिद्धि होती है बृहस्पति होय तो महान् सुख, बुध होय तो विजय और स्त्री और धनकी वृद्धि होतीहै ॥ ३९१ ॥ सूर्य होयतो मित्रोंकी वृद्धि चंद्रमा होयतो शोककी वृद्धि होतीहै मंगल होय तो रत्नोंका आगम और शनि होय तो कीर्तिका लोप होताहै ॥ ३९२ ॥ लाभ स्थानमें संपूर्ण ग्रह होंय तो लाभको कहे और व्यय १२ स्थानमे संपूर्ण ग्रह होय तो सदैव व्ययको कहैं ॥ ३९३ ॥ अपने उच्चका ग्रह होयतो पूर्ण फल कहाहै अपनी

राशिका ग्रह होय तो पादोन कहाहै अपने त्रिकोणका होय तो आधा फल देताहै मित्रके गृहका होय तो चौथाई फलको देताहै ॥ ३९४ ॥ समराशि वा रिपुकी राशिके ग्रह होंय तो समता और कष्ट फलको देतेहैं. नीचराशिमें स्थित ग्रह निष्फल कहाहै और वर्गका होय तो श्रेष्ठफलका दाता शुभ कहाहै ॥ ३९५ ॥ ॥ इति वास्तुशास्त्रे पं० मिहिरचंद्रकृतभाषाविवृतिसहिते तृतीयोऽध्यायः ॥ ३ ॥ उत्तम मध्यम निंदितभेदसे तीन प्रकारके गृह चौदह १४ प्रकारके कहेहैं, उनके संक्षेपसे प्रमाणको कहताहुं ॥ ३९६ ॥ वह गृह दोप्र कारका कहाहै और शरीर भिन्न २ प्रकारका होताहै और गृह नामका शरीर होताहै और शयनके चक्रमें शय्याको गृह कहतेहैं

समर्क्षेरिपुराशौचसमकष्टफलौग्रहौ ॥ नीचस्थोनिष्फलः प्रोक्तोवर्गेसत्फलदः शुभः ॥ ३९५ ॥ इतिवास्तुशास्त्रेतृतीयोऽध्यायः॥३ ॥
चतुर्दशविधाःप्रोक्ता गृहाश्चोत्तममध्यमाः ॥ निन्दिताश्चप्रमाणञ्चकथयामिसमासतः ॥ ३९६॥ गृहन्ताद्द्विविधंप्रोक्तंशरीरन्तुपृथग्विधम्॥ शरीरन्तुगृहन्नामशय्याशयनचक्रके ॥ ३९७ ॥ शय्यामानंस्वदेहेनसमङ्कार्यंसुखेप्सुना ॥ एकाशीत्यङ्गुलाशय्यानवत्यङ्गुलसम्मिता ॥ ३९८ ॥ तदर्द्धेनचविस्तीर्णापादुकाव्द्यङ्गुलौ ॥ आसनन्तुप्रकर्त्तव्यंशय्याविस्तारमानकम् ॥ ३९९ ॥ विस्तारंपादहीनन्तुतद्विस्तारंप्रकल्पयेत् ॥ उपानहौप्रकर्तव्यौस्वपादप्रमितौतथा ॥ ४०० ॥ पादुकेनतथाकार्येअन्यथादुःखशोकदौ ॥ अष्टाङ्गुलेनमानेनशय्यामानंप्रकल्पयेत् ॥ १ ॥

॥ ३९७ सुखका अभिलाषी मनुष्य शय्याका प्रमाण अपने देहके प्रमाण कितना करै शय्या ८१ इक्यासी अंगुलकी वा न०वह अंगुल के प्रमाणकी शय्या होतीहै ॥ ३९८ ॥ और उसके आधे प्रमाणसे उसका विस्तार होताहै और उसके पादुक (पावे) द्व्यतङ्गुल होतेहैं अर्थात् आधे अंगुल उंचे होतेहैं और शय्याके विस्तारके प्रमाणकाही आसन बनवाना ॥ ३९९ ॥ और उसके विस्तारसे पाद कम उसके विस्तारको अर्थात् चौड़ाईको करै और अपने चरणोंके समान उपानह बनवावै ॥ ४०० ॥ और पादुकभी चरणोंके समा-

नहीं बनवावै अन्यथा बनवावै तो दुःख और शोकको देतेहैं. आठ अंगुलके मानसे शय्याका प्रमाण बनवावै ॥ १ ॥ अथवा कामकी इच्छावाले राजाओंकी अन्यभी शय्या कहीहै ॥२॥ सौ अंगुलकी शय्या राजाओंकी बडी कहीहै ॥ ३ ॥ राजाके कुमारोंकी शय्या नव्वह अंगुलकी और मंत्रियोंकी शय्या ८४ चौरासी अंगुलकी होतीहै उससे बारह १२ अंगुल कम वलय और पर्यंकके ऊपर कल्पनाकी हुई ॥ ॥ ४ ॥ अथवा २८ अंगुल कम पुरोहितोंकी शय्या होतीहै उससे आधा और ८ अंश कम विष्टंभ (पाया) कहाहै ॥ ५ ॥ और तीस ३० अंगुलके मानका आयाम (चौडाई) और एक पादभर उंचाई कहीहै. संपूर्ण वर्णोंकी शय्या ८१ अंगुलकी कहीहै ॥ ६ ॥

अथवाह्यपरांप्रोक्तानृपाणाङ्काम्यमिच्छताम् ॥२॥ शताङ्गुलानृपाणान्तुंमहतीपरिकीर्तिता ॥ ३ ॥ कुमाराणान्तुनवतिः साषड्नातुमंत्रिणाम् ॥ साद्वादशोनावलयपर्य्यङ्कोपरिकल्पिता ॥ ४ ॥ पुरोहितानाञ्चतथाहीनाधृत्यङ्गुलैस्ततः ॥ अर्द्धन्ततोष्टांशहीनंविष्टम्भःपरिकीर्तितः ॥ ५ ॥ आयामास्त्र्यंशमानन्तुपादोच्छ्रायन्तुनिर्दिशेत् ॥ सर्वेषाञ्चैववर्णानामेकाशीतिमितास्मृता ॥६॥ सामंतानान्तुनवतिः सैकाशीतिमितातथा ॥ स्वदेहान्नातिदीर्घासानविस्तारातथैवच ॥ ७ ॥ हीनारोगप्रदादीर्घादुःखदासुखदासमा ॥ पाषाणैर्निर्मितंयत्तुतद्गृहम्मन्दिरंस्मृतम् ॥ ८ ॥ पक्वेष्टकंवास्तुनामभवनंहितमुत्तमम् ॥ अनिष्टकैःसुमनन्तुसुधारङ्कर्दमेनतु ॥ ९ ॥ मानस्यंवर्द्धितंकाष्ठैर्वेत्रैश्चचन्दनंस्मृतम् ॥ वस्त्रैश्चविजयंप्रोक्तंराज्ञांशिल्पिविकल्पितम् ॥ १० ॥

और सामन्तोंकी शय्या ९० अंगुल वा ८१ अंगुलकी कही है और वह शय्या न अपने देहसे लम्बीहो और न चौडी हो ॥ ७ ॥ अपने शरीरसे हीन शय्या रोगको देतीहै और शरीरसे लम्बी दुःखको और समान शय्या सुखको देतीहै. पत्थरोंसे बनाया जो घर उसै मंदिर कहते हैं ॥ ८ ॥ और पक्की ईंटोंसे बनाया जो घरहै उसै भवन कहतेहैं वह हित और उत्तम होताहै और कच्ची ईंटोंसे जो बनाहो उसे सुमन और कीच वा गारेसे बनाहो उसै सुधार कहतेहैं ॥ ९ ॥ काष्ठोंसे जो बनाया हो

और राजाओंका वस्त्रोंसे बनाया जो शिलिपयोंकी कल्पनासे स्थान
उसको मानस्य और वेंतोंसे जो बनाया हो उसको चंदन कहतेहैं और राजाओंका वस्त्रोंसे बनाया स्थानहै उसे कालिमा कहतेहैं और गृहस्थीयोंके चार स्थान उत्तम
उसे विजय कहतेहैं ॥१०॥ और जो आठमां तृणकी जातियोंसे बनाया स्थानहै उसे कालिमा कहतेहैं और गृहस्थीयोंके चार स्थान उत्तम
होतेहैं॥११॥कि सुवर्णसे चांदीसे तामेसे और लोहेसे बनेहुए वे चारों कहेहैं. सुवर्णसे बने हुएको कर और चांदीसे बने हुएको श्रीभव कहते
हैं ॥१२॥ तामेसे बनेहुएको सूर्यमंत्र और लोहेसे बने हुएको चण्ड नाम कहतेहैं और देव दानव गन्धर्व यक्ष राक्षस और पन्नग॥१३॥ ये पूर्वो

कालमेतिचविज्ञेयमष्टमंतृणजातिभिः ॥ उत्तमानिचचत्वारिगृहाणिगृहमेधिनाम् ॥ ४११ ॥ सौवर्णराजतंताम्रमायसंचप्रकीर्तितम् ॥
सौवर्णन्तुकरन्नामराजतंश्रीभवन्तथा ॥ १२ ॥ ताम्रेणसूर्यमन्त्रन्तुचण्डनामतथायसम् ॥ देवदानवगन्धर्वयक्षराक्षसपन्नगाः ॥ १३ ॥
द्वादशैतेप्रकारास्तुगृहाणांनियताः स्मृताः ॥ जातुषंत्वनिलंनामप्रायुवंवारिबन्धकम् ॥ १४ ॥ एवंसर्वासुजातीषुगृहाणिचचतुर्द
श ॥ चत्वारश्चोत्तमायेचतेगृहावर्णपूर्वकाः ॥ १५ ॥ शुभदाब्राह्मणादीनांसर्वेषामपिशोभनाः ॥ उत्तमाः शुद्धकालेषुस्थाप्याः शु
द्धविधानतः ॥ १६ ॥ काष्ठादिकृतगेहेषुकालापेक्षांनकारयेत् ॥ तृणदारुगृहारम्भेविकल्पंनैवकारयेत् ॥ १७ ॥ सौवर्णा
दिगृहारंभेमासदोषोनविद्यते ॥ पञ्चाङ्गशुद्धकालेतुनचैत्रसिंहपौषके ॥ १८ ॥

जिसमें हो उसको प्रायुव कहतेहैं॥१४॥
क गृहोंके बारह प्रकार नियमसे कहेहैं लाखसे बनाया जो घर है उसको अनिल और जलका बन्धन जिसमें हो उसको प्रायुव कहतेहैं॥१४॥
इसप्रकार संपूर्ण जातियोंमें१४प्रकार के घर होतेहैं चार जो पूर्वोक्त उत्तम घर हैं वे ब्राह्मण आदि वर्णोंके क्रमसे होतेहैं ॥१५॥ और ब्राह्मण
आदिकोंको शुभदायी होतेहैं और सब वर्णोंके लियेभी शोभन हैं उत्तम घरोंका शुभकालमें और शुद्धविधिसे स्थापन करना ॥ १६ ॥
काष्ठआदिसे बनाये हुए घरोंमें कालकी अपेक्षाको नकरै तृण और काष्ठके गृहारंभमें भी विकल्प नकरै. ॥ १७ ॥ सुवर्णआदिके गृहारंभमें

मासका दोष नहीं होता और पंचाङ्गके शुद्ध कालमें प्रारंभ करै और चैत्र भाद्रपद और पौष इनमें प्रवेश न करै ॥ १८ ॥ और महोत्सव
में प्रवेश न करै और पक्की ईंटोंसे बनाये हुए शिल्पके मानको कहतेहैं ॥ १९ ॥ काष्ठ आदिसे बनाये हुए घरमें स्तंभके मानको कहतेहैं.
सुवर्ण आदिके घरमें हस्तप्रमाणको कहतेहैं और लाखआदिसे बनाये घरमें किंचितभी प्रमाणको नहीं कहते ॥२०॥ पादुक और उपानह
अंगुलके प्रमाणसे बनवाने मंच आदि और आसनभी अंगुलसेही बनवाने ॥ २१ ॥ प्रतिमा पीठिका लिंग और स्तंभ गवाक्षोंका प्रमाण

प्रवेशनञ्चकर्तव्यंमहोत्सवदिनेतथा ॥ पक्केष्टकानिर्मितेतुशिल्पमानम्प्रवक्ष्यते ॥ १९ ॥ काष्ठादिनिर्मितेगेहेस्तंभमानंप्रचक्षते ॥
सौवर्णादिकेहस्तमानंजातुपाद्येनकिञ्चन ॥ २० ॥ पादुकोपानहौकार्य्यौअङ्गुलस्यप्रमाणतः ॥ मञ्चादिकश्चासनञ्चअङ्गुलेनैवकारयेत्
॥ २१ ॥ प्रतिमापीठिकाचापिलिङ्गंवास्तम्भमेववा ॥ गवाक्षाणांप्रमाणञ्चशिलामानन्तथैवच ॥ २२ ॥ खङ्गचर्मायुधादीनांप्रमा
णञ्चाङ्गुलानिच ॥ विषमाः शुभदाः पुंसांसमाः सौख्यविनाशकाः ॥ २३ ॥ अङ्गुलस्यप्रमाणन्तुकथयामिसमासतः ॥ नवाष्टसप्त
षट्पूर्वाअङ्गुलाः परिकीर्तिताः ॥ २४ ॥ त्रिविधस्यापिहस्तस्यप्रत्येकङ्कर्मदर्शितम् ॥ ग्रामखेटपुरादीनांविभागोयमविस्तरात् ॥२५ ॥
परिखाद्वाररथ्यश्चस्तम्भाः प्रासादवेश्मनाम् ॥ तेषान्निर्गममार्गेचसीमान्तेत्रांतराणिच ॥ २६ ॥

और शिलाका मान ॥२२॥ खड्ग और चर्म और आयुध इनका प्रमाण अंगुलसेही होताहै विषम अंगुल पुरुषोंको सुखदायी और सम
अंगुल पुरुषोंके सुखके नाशक होतेहैं ॥ २३ ॥ अब संक्षेपसे अंगुलके प्रमाणको कहताहुं नव आठ सात छः ये हैं पूर्व जिनके ऐसे अंगुल
कहेहैं ॥२४ ॥ तीन प्रकारके भी हाथका प्रत्येक कर्म दिखायाहै ग्राम खेट पुर आदिकोंका यह विभाग विना विस्तारसे हैं ॥ २५ ॥ परिखा
(खाई) द्वार रथ्या (गली) स्तम्भ जो प्रासाद (घरों) के होतेहैं और उनके निकसनेके मार्गमें और सीमाके अन्तमें अन्त्रान्तर ॥ २६ ॥

और दिशान्तरोंका विभाग वस्त्र और आयोधनका विभाग और मार्गका परिमाण क्रोश गव्यूति और योजनोंसे होताहै ॥ २७ ॥ खात क्रकच इनकी राशि प्रासादका आंगन और आयत इनको नौ ९ जिसमें यव हों ऐसे अंगुलके हाथसे मापकर बनवावै ॥ २८ ॥ आयोधन चर्म और चर्म आयुध वापी कूपका और हाथी और घोडोंका प्रमाण ॥ २९ ॥ इक्षुयन्त्र (कोल्हू) आरघण्ट हलयूप युग (जूआ) ध्वजा और जिनमें जल नहो ऐसी नाव और शिल्पीयोंकी गजआदि वस्तु

दिशान्तरविभागाश्चवस्त्रायोधनयोस्तथा ॥ अध्वनः परिमाणंचक्रोशगव्यूतियोजनैः ॥ २७॥ खातक्रकचराशीचप्रासादायनमापनम् ॥ नवयावाङ्गुलेहस्तेतस्यमानंप्रचक्षते ॥२८॥ आयोधनानिचर्माणितथाचंडायुधानिच ॥ वापीकूपप्रमाणानितथाचगजवाजिनाम् ॥ २९ ॥ इक्षुयंत्रारघण्टाश्चहलयूपयुगध्वजाम् ॥ अतोयानिचनावश्चशिलिपनांवाप्युपस्करम्॥३०॥पादुकेवदशीछत्रंधर्मोद्यानानिचैवहि ॥ मात्राष्ट्यवहस्तेननचदंडांश्चमापयेत् ॥ ३१ ॥ जालन्धरेहस्तसंख्यावेधेचदंडकास्तथा ॥ मध्यदेशेक्रोशसंख्याद्वीपान्तरेतुयोजनम् ॥ ३२ ॥ चतुर्विंशत्यङ्गुलैस्तुहस्तमानंप्रचक्षते ॥ चतुर्हस्तोभवेद्दण्डः क्रोशस्तद्विसहस्रकम् ॥ ३३ ॥ चतुष्क्रोशंयोजनंतुवंशोदशकरैर्मितः ॥ निवर्त्तनंविंशतिकरैः क्षेत्रंतच्चचतुष्करैः ॥३४॥ शतवेश्मनिदेशाश्चगृहादीनान्निवर्त्तनम् ॥ एकाशीतिपदेनैवसर्वस्थानंचमापयेत्॥३५॥

॥ ३० ॥ पादुक वदशी (कोठी) छत्र धर्मके उद्यान इनका प्रमाण आठ ८ जौंके हाथसे करै और दण्डोंको नमापै ॥ ३१ ॥ जालन्धरमें हस्तकी संख्या और वेधमें दण्डकी और मध्यदेशमें क्रोशकी संख्या और द्वीपान्तरमें योजनकी संख्या होतीहै ॥ ३२ ॥ २४ चौवीस अंगुलोंसे हाथका प्रमाण कहतेहैं चार हाथका दण्ड होताहै और दो २ सहस्र हाथका क्रोश होताहै ॥ ३३ ॥ ४ क्रोशका योजन और दश हाथका एक वंश होताहै वीस हाथका निवर्तन और चौवीस हाथका क्षेत्र होताहै ॥ ३४ ॥ सौ घरोंका स्थान और गृह आदिकोंका निवर्तन इन सबका स्थान ८१ इक्यासी पदोंके वास्तुसे मापकर बनावै ॥ ३५ ॥

चल और अत्यन्त स्थिरभेदसे दो प्रकारके प्रासाद कहेहैं और चौसठ६४प्रकारके मण्डप और देवताओंके आश्रय प्राकार॥३६॥ और विशेष कर
जो छत्र (तम्बू) है और जो आठ प्रकारके मण्डपहै इन सबकी कल्पनाभी ६४ पदके वास्तुसेही करैं॥३७॥ नगर ग्राम कोट और राजाओंके स्थावर
गृह इनको स्थपति (प्रधान पुरुष कारीगर) के यहां स्थित जो यति अर्थात् अकस्मात् आयाहुआ संन्यासी उसके हाथके प्रमाणसे मापै॥३८॥
स्निग्धआदि भूमिके भागमें पैदा हुए जो वट बेल खैर शमी न्यग्रोध गूलर देवदारु क्षीरके वृक्ष और अपने देशमें पैदाहुए फलके वृक्ष ॥३९॥

प्रासादाद्विविधाःप्रोक्ताश्चलाः स्थिरतरास्तथा ॥ मण्डपाश्चचतुष्षष्टिः प्राकारांदेवताश्रयाः ॥ ३६ ॥ विशेषेणापियेछात्रास्तथायेचा
ष्टमण्डपाः ॥ चतुष्षष्टिपदेनैवसर्वानेतान्प्रमापयेत् ॥ ३७ ॥ नगरग्रामकोटादिस्थविराणिचभूभृताम् ॥ स्थपतिस्थास्थितयति
प्रविभागेनमापयेत् ॥ ३८ ॥ स्निग्धादिभूभागसमुत्थितानांन्यग्रोधबिल्वद्रुमखादिराणाम् ॥ शमीवटोदुम्बरदेवदारुक्षीरिस्वदेशो
त्थफलद्रुमाणाम् ॥ ३९ ॥ उपोषितः शिल्पिजनस्तुयेषांमध्यात्तुतीक्ष्णेनकुठारकेण ॥ छिन्द्यात्ततोदिक्पतितोत्तरस्यांशु
भेविलग्नेपरिगृह्यशङ्कुम् ॥ ४० ॥ करप्रमाणंपरतश्चतस्रस्तदर्द्धमानेनततोनुगृह्य ॥ नीत्वान्यसेत्तानिगृहेचतावद्यावत्प्रतिष्ठानसमश्च
शङ्कोः॥४१॥ नन्दंतिशुक्लाकथितेशकोणेहुताशनाख्येसुभगेतिचान्या ॥ सुमङ्गलीनैर्ऋतिभागसंस्थाभद्रङ्करीमारुतकोणयाता ॥ ४२ ॥

इन सबको उपवास कियाहै जिसने ऐसा शिल्पि जन मध्य भागमें तीक्ष्ण कुठारसे छेदन करै फिर दिशाके पतिसे उत्तर दिशामें शुभ
लग्नमें शंकु (खुंटी) आदिको ग्रहण करिके ॥ ४० ॥ और उस शंकुके चारों तरफ चार हाथभर वा उसके आधे प्रमाणसे भूमिको ग्रहण
करिके छेदन कियेहुए उन पूर्वोक्त वृक्षोंको लेजाकर तबतक रक्खे जबतक शंकुकी प्रतिष्ठाकी समानता हो॥४१॥ ईशकोण (ईशान) की
नन्दन्ती(शिला) को शुक्ला और अग्निकोणकीका शुभगा और नैर्ऋतकोणकीका सुमंगली और वायुकोणकीका भद्रंकरी नाम कहतेहैं ॥४२॥

वृष अश्व पुरुष नाग इनके समान पैरोंसे क्रमसे अंकित जो नन्द आदि शिला हैं उनका ऐसीयोंका ग्रहण करना कहाहै जो अखण्डित हों और भलीप्रकार दृढ हों और जो शुभ लक्षणकी हों ॥ ४३ ॥ और उन शिलाओंके मध्यमें क्रमसे कूर्म्म (कच्छप) शेष जनार्दन और श्री ध्रुव इन चारोंको भवनके मध्यमें स्थितिके लिये स्थापन करै यह प्रमाण मुनियोंने कहाहै ॥ ४४ ॥ और शिलाओंका प्रमाण वर्णोंके क्रमसे यह कहाहै कि इक्कीस २१ घन (१४) तेरह नन्द (९) इतने अंगुलोंका विस्तार वर्णोंके क्रमसे जानना और इनसे आधा

वृषाश्वपुन्नागपदाङ्कितानांनन्दादिकानांक्रमशश्शिलानाम् ॥ अखण्डितानांसुदृढीकृतानांसुलक्षणानांग्रहणंनिरुक्तम् ॥ ४३ ॥ कूर्मश्च शेषश्चजनार्द्दनःश्रीर्ध्रुवश्चमध्येभवनस्यसंस्थाः ॥ निवेशनीयाः क्रमशः शिलानाम्प्रमाणमेतन्मुनिभिःप्रदिष्टम् ॥ ४४ ॥ शिलाप्रमाणं क्रमशः प्रदिष्टंवर्णानुपूर्व्येणतथाङ्गुलानाम् ॥ अथैकविंशंघनविश्वनन्दाविस्तारकेव्यासमितंतदर्द्धम् ॥ ४५ ॥ तदर्द्धमानं त्वथपिण्डिकास्यादूर्द्धाधिकान्यूनतरानकार्या ॥ प्रमाणहीनासुतनाशकारिणीव्यङ्गाव्ययंभ्रष्टविवर्णदेहा ॥ ४६ ॥ धनार्त्तिदाप्रस्तरगेहमानेकार्याशिलाशिल्पिजनानुकूला ॥ पाषाणगेहेकर्तव्याशिलापाषाणसंभवा ॥ शैलजेशैलजापीठश्चैष्टकेचैष्टकःस्मृतः ॥४७॥ शिलान्यांसादिकोभद्रेमूलपादोविधीयते ॥ पक्केष्टनिर्मितेचैवइष्टकानाञ्चकारयेत् ॥ ४८ ॥

व्यास होताहै॥४५॥ और उससे आधा प्रमाण पिण्डिकाका होताहै वह ऊपरको अधिक बनानी अत्यन्त न्यून न बनानी और प्रमाणसे हीन होय तो पुत्रके नाशको करतीहै और व्यंग (टूटी) भ्रष्ट और विवर्ण देह (मैली) व्यय अर्थात् अधिक खर्च वा नाशको करतीहै ॥ ४६ ॥ और धनकीभी नष्टताको करतीहै और विस्तारके घरका जो प्रमाण हो उसके समान शिल्पि जनोंके अनुकूल शिला बनवानी पत्थरके घरमें शिला पत्थरकी ही बनवानी शिलाके घरमें शिलाओंसे बनवानी और ईटके घरमें ईटकाही पीठ कहाहै ॥४७॥ भद्रनामके घरमें मूलपाद

शिलास्थापन आदिका कहाहै और पक्की ईटोंके घरमें ईटोंकाही मूलपाद बनवावै ॥ ४८ ॥ ईटोंके बनायेहुए घरमें वास्तुके विषै शि
लाके प्रमाणको देखना और अन्य घरोंमें शिलाके प्रमाणकी चिन्ता नकरनी ॥ ४९ ॥ और आधारकी जो शिलाहै वह ऐसी बनवानी
जो दृढ मनोहर परिमाणसे युक्त उत्तम जिसके लक्षण हों जो परिमाणके मानसे न अधिक और न अत्यन्त न्यून हो और जिसका रंग
काला हो ॥ ४५० ॥ द्वारके अधिप आदि स्वामी गज अश्व इनका बलि और मंत्रोंसे भली प्रकार पूजन करै फिर स्नानके लिये सुन्दर

इष्टकानिर्मितेगेहेप्रमाणमिहलक्षयेत् ॥ अपरेषांगृहाणांतुशिलामानंनचिन्तयेत् ॥४९॥आधारभूतातुशिलाप्रकल्प्यादृढामनोज्ञापरिमाण
युक्ता॥सल्लक्षणाचापरिमाणमानांनचाधिकान्यूनतरानकृष्णा ॥५०॥ द्वाराधिपादीन्पतयोगजाश्वाः सम्पूजनीयावलिभिः समंत्रैः॥स्नानार्थ
मानीयसुतीर्थतोयन्ततोपहारैः प्रतिपूज्यकुम्भम् ॥५१॥ध्रुवेशिलायास्तुततः खनित्वाकुंभंप्रतिष्ठाप्यशराङ्गुलीयम्॥विप्रादिवर्णानुगतःप्र
शस्तस्तदर्द्धमानतुतदर्द्धमानम् ॥ ५२ ॥ जलाक्षतव्रीहिसपञ्चगव्यमध्वाज्यजातंपरिपूर्य्यसम्यक् ॥ शिलाविन्यासकालेतुसंभारां
श्चोपकल्पयेत् ॥ ५३ ॥ समुद्रेयानिरत्नानिसुवर्णरजतंतथा ॥ सर्ववीजानिगन्धाश्चशरादर्भास्तथैवच ॥ ५४ ॥ शुक्लाः सुम
नसः सर्पिः श्वेतश्चमधुरोचनाः ॥ आमिषञ्चतथामद्यंफलानिविविधानिच ॥ ४५५ ॥

तीर्थके जलको लाकर पूजाकी सामग्रीयोंसे कुंभका पूजन करके ॥ ५१ ॥ फिर शिलाके ध्रुवभागमें पांच अंगुल खोदकर उस कुंभका
स्थापन करै और वह कुम्भ ब्राह्मण आदि वर्णोंके अनुसार आधे २ न्यून प्रमाणसे प्रशस्त होताहै ॥ ५२ ॥ और उस कुंभको जल अक्षत
व्रीहि पंचगव्य मधु घृत आदिसे भलीप्रकार पूर्ण करिके और शिलाके स्थापन समयमें सामग्रीयोंको इकट्ठी करै ॥ ५३ ॥ समुद्रमें
जितने रत्नहों उनको और सुवर्ण चांदी सर्व बीज गन्ध शर कुशा॥५४॥सफेद पुष्प घी सफेद मधु गोरोचन आमिष (मांस)और मदिरा

नानाप्रकारके फल ॥ ५५ ॥ नैवेद्यके लिये पकान्न वस्त्र और ऐसे भूषण जो सफेद पीले रक्त और कृष्णवर्णके क्रमसे हों ॥ ५६ ॥ गन्धआदि वस्त्र और पुष्प इनको वास्तुविधानके ज्ञाताओंसे बडी सावधानीसे इकट्ठे करवावै ॥ ५७ ॥ ॥ इति वास्तुशास्त्रे पं०मि० भाषा० गृहादि निर्माण वर्णनं नाम चतुर्थोऽध्यायः ॥ ४ ॥ ॥ जो आपने भलीप्रकार प्रासादोंका क्रम कहा वह हमने सुना अब वास्तुदेहके लक्षणको सुना चाहते हैं ॥५८॥ पाहिले वह भगवान् वास्तुपुरुष आपने कहा और पूर्वोत्तर मुख वास्तुपुरुषकी रचना आपने कही ॥५९ ॥ और इन्द्र आदि

नैवेद्यार्थञ्चपकान्नंवस्त्राण्याभरणानिच ॥ श्वेतंपीतंतथारक्तंकृष्णंवर्णक्रमेणच ॥ ५६ ॥ गन्धादींश्चैववस्त्रञ्चपुष्पाणिचतथैवच ॥ वास्तुविद्याविधानज्ञैः कारयेत्सुसमाहितः ॥ ५७ ॥ इतिवास्तुशास्त्रेगृहादिनिर्माणेचतुर्थोऽध्यायः ॥ ४ ॥ ॥ प्रोक्तंयद्भवतासम्यक्प्रासादानांयथाक्रमम् ॥ अधुनाश्रोतुमिच्छामिवास्तुदेहस्यलक्षणम् ॥ ५८ ॥ पुरासभगवान्वास्तुपुरुषः परिकीर्तितः ॥ पूर्वोत्तरमुखोवास्तुपुरुषः परिकल्पितः ॥ ५९ ॥ देवैःसेन्द्रादिभिस्तस्मिन्कालेभूमौनिपातितः ॥ अवाङ्मुखोनिपतितईशान्यांदिशिसंस्थितः ॥ ६० ॥ शिरोभागेस्थितोवह्निर्मुखेआपस्तनेयमः ॥ उत्तरस्यापवत्सश्चसव्यमार्गसमाश्रितः ॥ ६१ ॥ पर्जन्याद्यास्तथानासादृक्छ्रूवोरःस्थलांसगाः ॥ सत्ताद्याःपंचचभुजेविन्यस्यपुरुषोत्तमे ॥ हस्तेसवितासावित्रोवितथोथगृहक्षतः ॥ ६२ ॥ पार्श्वेजठरेविवस्वाँश्चआस्थितः परितस्सदा ॥ ऊरूजानूजंघास्फिचोयमाद्यैः परिवेष्टिताः ॥ एतेदक्षिणपार्श्वस्थावामपार्श्वेतथैवच ॥ ४६३ ॥

देवताओंने उसकालमें उसे भूमिमें पतनकिया और वह नीचेको मुखकिये गिरा और ईशानदिशामें स्थितहुआ ॥ ६० ॥ उसके शिरभागमें अग्नि स्थितहै मुखमें जल स्तनमें यम उत्तरभागमें स्थित आपवत्स वामस्तनमें स्थित रहताहै ॥ ६१ ॥ और पर्जन्य आदि देवता नासिका नेत्र कर्ण उरःस्थल और स्कन्धोंमें स्थित रहतेहैं और सत्त आदि पांच पुरुषोत्तमकी भुजामें स्थितकरै और हस्तमें सूर्य सावित्री इनका हाथमें वितथ और गृहक्षत ॥६२॥ इनका पार्श्वमें और जठर (पेट) चारों तरफ विवस्वान् स्थित रहताहै और ऊरू (जंघा) जानु स्फिक् ये यमदिशा आदिसे स्थित रहतेहैं ये दक्षिणपार्श्व और वामपार्श्व दोनोंमें स्थित रहतेहैं ॥ ६३ ॥

66

शेष देवता और दण्ड जयन्त ये लिंग-इन्द्रियमें स्थित रहतेहैं और चरणोंमें पितरों सहित वास्तुपुरुष रहताहै और ४५
पैतालीस कोष्ठ चारों तरफ ब्रह्माके होतेहैं ६४ चौंसठ पदके वास्तुमें ब्रह्मा आदिक देवता रहतेहैं और उनके, कोणमें तिर
छे कोष्ठोंमें द्विज रहतेहैं ॥ ६५ ॥ ब्रह्माने चौसठ पदका वास्तु प्रासादमें कहाहै ब्रह्मा वास्तुमें चतुष्पद कहाहै और कोणके विषै आ
धे २ पद कहेहैं और सोलह कोणोंमें सार्द्ध पद (१॥) दोनों भागोंमें स्थित होतेहैं और वीस २० दोदो पदके देवता चौसठपदके वास्तु

शेषादण्डजयन्तौचमेढ्रेब्रह्माद्द्दिस्थितः ॥ पादेसमाश्रितइतिपितृभिःपरिवारितः ॥ चत्वारिंशत्पञ्चयुक्ताः परितोब्रह्मणस्तथा ॥६४ ॥
चतुःषष्टिपदेवास्तौदेवाब्रह्मादयस्तथा ॥ कोणेतेषांप्रकर्तव्यास्तिर्यक्कोष्ठगताद्विजाः ॥६५॥ चतुःषष्टिपदोवास्तुः प्रासादेब्रह्मणास्मृतः ॥
ब्रह्माचतुष्पदोह्यत्रकोणाद्यर्द्धपदाःस्मृताः ॥ ६६ ॥ षोडशकोणगाः सार्द्धपदाश्चाथोभयस्थिताः॥विंशतिर्द्विपदाश्चैवचतुःषष्टिपदेस्मृताः
॥ ६७॥ जीर्णोद्धारेतथोद्यानेतथागृहनिवेशने ॥ नवप्रासादभवनेप्रासादपरिवर्तने ॥ ६८ ॥ द्वाराभिवर्तनेतद्वत्प्रासादेषुगृहेषुच ॥ वास्तू
पशमनङ्कुर्य्यात्पूर्वमेवविचक्षणः ॥ ६९ ॥ वास्तुमण्डलकोणेषुईशानादिक्रमेणच ॥ शंकूनांरोपणंशस्तंप्रादक्षिण्येनमार्गतः ॥ ७० ॥
विशंतुभूतलेनागालोकपालाश्चसर्वशः ॥ अस्मिन्गृहेवतिष्ठन्तुआयुर्बलकराःसदा ॥ ७१ ॥

में कहेहैं ॥ ६७ ॥ जीर्णोद्धारमें और उद्यानमें और गृहके प्रवेशमें और नवीन प्रासाद और भवनमें और प्रासादके परिवर्तन (ब
नाना) में । ६८ ॥ द्वारके बनवाने और प्रासाद गृहोंमें बुद्धिमान् मनुष्य पहिलैही वास्तुशान्तिको करै ॥ ६९ ॥ और वास्तुमण्ड
लके कोणोंमें ईशान दिशा आदिके प्रदक्षिणक्रमसे शंकुओंका रोपण (रखना) श्रेष्ठ होताहै ॥ ७० ॥ नाग भूतलके विषै प्रवेश करौ
और समस्त लोकपाल जो आयु और बलके करनेहारे हैं वे सदैव इस गृहके विषै टिको इस मंत्रको पढकर वास्तुके कोणमें शंकुओंको

रखै ॥७१॥ प्रासाद आराम वापी कूप उद्यानमें नामोच्चारणपूर्वक कोणोंमें ४ शंकुओंका स्थापन करै॥७२॥अग्नि सर्प और जो अन्यदिशामें देवता स्थित हैं उनके लिये पवित्र और उत्तम ओदनकी बलिको देताहूं ॥ ७३ ॥ सुवर्णकी रेखाओंसे वास्तुके विषै ८१ इक्यासी पद करै फिर सूत्रको चारों तरफ रखकर चूनसे आलेखन करै ॥ ७४ ॥ दशरेखा पूर्वको लम्बी और दशरेखा उत्तरको लम्बी करै संपूर्ण वास्तुओंके विभागोंमें ये नौ ९ नवक जानने ॥ ७५ ॥ शान्ता यशोवती कान्ता विशाला प्राणवाहिनी सती सुमनाः नन्दा

प्रासादारामवापीषुकूपोद्यानेषुचैवहि ॥ तन्नामपूर्विकारोप्याकोणेशङ्कुचतुष्टयम् ॥ ७२ ॥ अग्निभ्योप्यथसर्पेभ्योयेचान्येतत्समाश्रिताः॥ तेभ्योबलिम्प्रयच्छामिपुण्यमोदनमुत्तमम् ॥ ७३ ॥ एकाशीतिपदङ्कुर्य्याद्रेखाभिःकनकेनच॥पश्चात्पिष्टेनचालिख्यसूत्रेणालोड्यसर्वतः ॥ ७४ ॥ दशपूर्वायतारेखादशचैवोत्तरायताः ॥ सर्वावास्तुविभागेषुविज्ञेयानवकानव ॥ ७५ ॥ शान्तायशोवतीकान्ताविशालाप्राणवाहिनी ॥ सतीचसुमनानन्दासुभद्रासुस्थितातथा ॥७६॥ पूर्वापरागताह्येताउदग्याम्याश्रितास्तथा ॥ हिरण्यासुव्रतालक्ष्मीर्विभूतिर्विमलाप्रिया ॥ ७७ ॥ जयाकालाविशोकाचतथेन्द्रादशमीस्मृता ॥ एकाशीतिपदेह्येताःशिराश्चपरिकीर्तिताः ॥ ७८ ॥ श्रियायशोवतीकान्तासुप्रियापिपराशिवा ॥ सुशोभासधनाज्ञेयातथेभानवमीस्मृता ॥ ७९ ॥ पूर्वापरातथाह्येताश्चतुष्षाष्टिपदेस्थिताः ॥ धन्याधराविशालाचस्थिरारूपागदानिशा ॥ ८० ॥

सुभद्रा और सुस्थिता ॥ ७६ ॥ ये दश १० रेखा पूर्वपश्चिमके गत (गई) होतीहैं और उत्तर और दक्षिणके आश्रित ये होतीहैं कि- हिरण्या सुव्रता लक्ष्मी विभूति विमला प्रिया ॥७७॥ जया काला विशोका और दशमी इन्द्रा कहीहै. इक्यासी पदके वास्तुमें ये शिरा कहीहैं ॥ ७८ ॥ श्रिया यशोवती कान्ता सुप्रिया पुरा शिवा सुशोभा सधना और नौमी इभा ॥७९॥ ये नौ शिरा पूर्वसे पश्चिमपर्यन्त चौ

चौसठपदके वास्तुमें होतीहैं धन्या धरा विशाला स्थिररूपा गदा और निशा ॥८०॥ विभवा प्रभवा और सौम्या ये उत्तरादिशामें नौ ९ शिरा होतीहैं पदके आठमें अंशको कर्मसंज्ञकभाग कहतेहैं ॥ ८१ ॥ पदके हाथकी संख्यासे जो निवेश उसै अंगुल कहतेहैं और विस्तार किये वंशका जो ऊर्द्धभाग उतना शिराका प्रमाण कहतेहैं ॥८२॥ और वासोंका जो सम्पात उसकाभी मध्यम और समभाग जो हो वहभी शिराका मान जानना और उसके मध्यमें जो पदहो उन सबको भयके दाता जानै ॥८३॥बुद्धिमान् मनुष्य उनपदोंको शुद्ध भाण्ड

विभवाप्रभवाचान्यासौम्यासौम्याश्रिताः शिराः ॥ पदस्याष्टांशकोभागस्तत्प्रोक्तंकर्मसंज्ञकम् ॥ ८१ ॥ पदहस्तसंख्ययासम्मितो निवेशोङ्गुलानि ॥ विस्तीर्णवंशव्यासोर्द्धंशिरामानंप्रचक्षते ॥ ८२ ॥ संपाताअपिवंशानांमध्यमानिसमानिच ॥ पदानांपातितान्विद्यात्सर्वाणि भयदान्यपि ॥ ८३ ॥ नतानिपीडयेत्प्राज्ञःशुचिभाण्डैश्चकीलकैः ॥ स्तंभैश्चशल्यदोषैश्चगृहस्वामिषुपीडनम् ॥ ८४ ॥ तस्मिन्नवयवेतस्यवाधाचैवप्रजायते ॥ कण्डूयतेयदङ्गंवागृहस्वामीतथैवच ॥ ८५ ॥ होमकालेचयज्ञादौतथाभूम्निपरीक्षणे ॥ अग्नेर्वाविकृतिर्यत्रतत्रशल्यंविनिर्दिशेत् ॥ ८६ ॥ धनहानिर्दारुमयेपशुपीडास्थिसंभवे ॥ रोगस्यापिभयम्प्रोक्तन्नागदन्तोपिदूषकः ॥ ८७ ॥ वंशानीमानिवक्ष्यामिबहूनपिपृथक्पृथक् ॥ वायुंयावत्तथारोगात्पितृभ्यः शिष्यतस्तथा ॥ ८८ ॥

और कीलोंसै पीडित न करै और न स्तम्भ और शल्यके दोषोंसे पीडित करै करै; तौ गृहके स्वामीको पीडा॥८४॥उसी अवयवमें होतीहै जिस अवयवमें वास्तुपुरुषकेहो- और जिस वास्तुके अंगमें कण्डूति (खुजली) करै उसी अंगमें घरके स्वामीके कण्डूति होतीहै ॥८५॥ होमके समयमें और यज्ञ और भूमिकी परीक्षामें जहां अग्निका विकारहो जाय वहां शल्यको कहै अर्थात विघ्नकी शंका होतीहै ॥ ८६ ॥ काष्ठके वासमें धनकी हानि अस्थिके वांसमें पशुओंमें पीडा और रोगका भय कहाहै, और हाथीदांतभी दूषित है ॥ ८७ ॥ इससे इन

बहुत प्रकारके वांसोंको पृथक् २ कहताहूं कि रोगसे वायुपर्यंत और शिखीसे पितरोंतक ॥ ८८ ॥ और मुख्यसे भृंगतक और शोकसे वितथपर्यंत और सुग्रीवसे अदितिपर्यंत और भृंगसे पर्जन्यपर्यंत ॥ ८९ ॥ ये वांस शास्त्रकारोंने कहे हैं और कहीं दुर्जयभी कहाहै. इनका जो पदके मध्यमें चारों तरफका संपात है ॥ ९० ॥ उसको प्रवेश कहतेहैं वह त्रिशूल वा कोणके आकारका जो होताहै वह स्तंभोंको रखने और तुलाके रखनेमें सदैव वर्जितहैं ॥ ९१ ॥ और संपूर्ण कर्मोंमें वास्तु पुरुष दक्षिण और अग्निकोणमें आयत (लंबा) कहाहै. इकासी ८१ पदके इस वास्तुमें देवताओंके स्थापनको सुनो ॥ ९२ ॥

मुख्याद्भृङ्गस्तथाशोकाद्वितथंयावदेवतु ॥ सुग्रीवाददितिंयावद्भृङ्गात्पर्जन्यमेवच ॥ ८९ ॥ एतेवंशाःसमाख्याताः क्वचिद्दुर्जयएवतु. ॥ एतेपांयस्तुसंयातः पदमध्येसमन्ततः ॥ ९० ॥ एतत्प्रवेशमाख्यातंत्रिशूलङ्कोणकञ्चयत् ॥ स्तम्भन्यासेषुवर्ज्यानितुलावन्धेषुसर्वदा ॥ ९१ ॥ सर्वत्रवास्तुनिर्दिष्टःपितृवैश्वानरायतः ॥ एकाशीतिपदेह्यस्मिन्देवतास्थापनेशृणु ॥ ९२ ॥ रेखाणाञ्चफलन्तत्रकथयामि समासतः ॥ वर्णानुपूर्व्येणतथाअङ्गस्पर्शनकंपरम् ॥ ९३ ॥ विप्रः स्पृष्ट्वातथाशीर्षञ्चक्षुः क्षत्रियकस्तथा ॥ विशश्चोरूचशूद्रश्चपादौ स्पृष्ट्वासमारभेत् ॥ ९४ ॥ अङ्गुष्ठकेनवाकुर्यान्मध्याङ्गुल्यास्तथैवच ॥ प्रदेशिन्याथापितथास्वर्णरौप्यादिधातुना ॥ ९५ ॥ मणि नाकुसुमैर्वापितथादध्यक्षतैःफलैः ॥ शस्त्रेणशत्रुतोमृत्युर्वन्धोलोहेनभस्मना ॥ ९६ ॥

और उसमें रेखाओंके फलकोभी संक्षेपसे कहताहूं और वर्णोंके क्रमसे श्रेष्ठ अंगके स्पर्शको कहताहूं ॥ ९३ ॥ ब्राह्मण शिरका स्पर्श करके क्षत्रिय नेत्रका स्पर्श करके और वैश्य जंघाओंका स्पर्श करके और शूद्र चरणोंका स्पर्श करके वास्तुके पूजन का प्रारंभ करै ॥ ९४ ॥ और अंगुठेसे वा मध्यकी अंगुलिसे वा प्रदेशिनीसे अथवा सुवर्ण चांदि आदि धातुसे पूजनको करै ॥ ९५ ॥ अथवा मणिसे वा पुष्पोंसे वा दही अक्षत फलोंसे पूजन करै और शस्त्रसे पूजन करै तो शत्रुसे मृत्यु होतीहै और लो

हेसे बंधन और भस्मसे ॥९६॥ अग्निका भय और तृण और काष्ठ आदिके लिखनेसे राजासे भय होताहै और वक्र (टेढा) और खंडित होनेपर शत्रुसे भय होताहै ॥ ९७ ॥ कुरूप रेखा और चर्म और दांतोंसे बनाई रेखा और कोला और अस्थिसे बनाई रेखा कल्याणके लिये नहीं होती और स्वामीके मरणको करती है ॥ ९८ ॥ अपसव्य (वाम) क्रमसे करै तो वैर और दक्षिण क्रमसे करै तो संपदा होतीहै और वास्तुकर्मके प्रारंभमें छिक्का और ष्ठीवन (थूक) इनको वर्जदे ॥ ९९ ॥ और

अग्नेर्भयन्तृणेनापिकाष्ठादिलिखितेनच॥नृपाद्भयन्तथावक्रेखण्डेशत्रुभयम्भवेत् ॥ ९७ ॥ विरूपाचर्मदन्तेनचाङ्गारेणास्थिनापिवा ॥ नशिवायभवेद्रेखास्वामिनोमरणन्तथा ॥ ९८ ॥ अपसव्यक्रमेवैरंसव्येसंपदमादिशेत् ॥ तस्मिन्कर्मसमारंभेक्षुतन्निष्ठीवितन्तथा ॥ ९९ ॥ वाचस्तुपरुषास्तत्रयेचान्येशकुनाधमाः ॥ तान्विवर्ज्यप्रकुर्वीतवास्तुपूजनकर्म्माणि ॥ ६०० ॥ अकचटतपयशवर्गा इत्यष्टदिक्षुच ॥ प्राचीप्रभृतिषुवर्णास्तत्परङ्कारयेत्फलम् ॥ १ ॥ एतेवर्णाःप्रश्नकालेमध्येपञ्चैकमक्षरम् ॥ तेनशल्यंविजानीयाद्दिशितस्यांचवेश्मनः ॥ २ ॥ एतेभ्योवापरम्बाह्येप्रश्नंयद्द्व्यक्षरंभवेत् ॥ तदाशल्यंनजानीयाद्गृहमध्येविनिश्चयः ॥३॥ एकाशीतिपदङ्कुर्य्याद्वास्तुवित्सर्ववास्तुषु ॥ आदौसम्पूज्यगणपन्दिक्पालान्पूजयेत्ततः ॥ ४ ॥

जो कठोर वाणी और जो बुरे शकुन हैं उनको वर्जकर वास्तुकर्मका प्रारंभ करै ॥ ६०० ॥ अ क च ट त प य श ये वर्ग आठोंदिशाओंमें पूर्वदिशासे लेकर स्थितहैं उसके अनन्तर फलको कहै ॥ १ ॥ वर्ण प्रश्नके कालमें मध्यमें एक अक्षर जो होताहै उससे उसी दिशाके विषै घरमें शल्य (विघ्न) को जानै ॥ २ ॥ और इनसे धरै बाहिरके देशमें यदि दो अक्षरका प्रश्न होय तो तब गृहके मध्यमें शल्यको नजाने यह शास्त्रका निश्चयहै ॥ ३ ॥ वास्तुका ज्ञाता पुरुष संपूर्ण वास्तुओंमें ८१ इक्यासी पदके

71

72

वास्तुको करै. प्रथम गणेशजीका पूजन करकै फिर दिक्पालोंका पूजन करै ॥ ४ ॥ भूमिपर कलशका स्थापन करके फिर मातृकाओंका पूजन करै फिर नान्दीमुख श्राद्धको करै फिर उसके अनंतर पवित्र ब्राह्मण और देवता आदिका पूजन करै ॥ ५ ॥ और अग्निकी स्थापनाके लिये तीन मेखलाओंसे युक्त विशेषकर योनिके आकारका कुण्ड बनावै ॥ ६ ॥ अथवा बुद्धिमान् मनुष्य संपूर्ण कर्मोंमें स्थण्डिलकोही करै और पदमें स्थित सम्पूर्ण देवताओंका और ३५ पैंतीस देवताओंका पूजन करै ॥ ॥ ७ ॥ शिखी देवता एक पदका कहाहै और पर्जन्यभी एकही पदका होताहै. जयन्त दो २ पदका और सूर्यभी दो पदका

धरित्र्यांकलशंस्थाप्यमातृकाःपूजयेत्ततः ॥ नान्दीश्राद्धन्ततःकुर्यात्पुण्यानभ्यर्च्चयेत्ततः॥५॥अग्निसंस्थापनार्थन्तुमेखलात्रयसंयुतम् ॥
कुण्डंकुर्याद्विधानेनयोन्याकारंविशेषतः ॥ ६ ॥ स्थण्डिलंवाप्रकुर्वीतमतिमान्सर्वकर्मसु॥ पदस्थान्पूजयेत्सर्वान्पञ्चत्रिंशत्तथैवच ॥७॥
शिखाचैकपदंप्रोक्तःपर्जन्यश्चतथैवच ॥ जयन्तोद्विपदःसूर्य्यःसत्यंभृशौद्विकोष्टकौ ॥८॥ पदैकमन्तरिक्षस्तुवायुश्चैकपदःस्मृतः ॥ ९ ॥
पूषाचैकपदोह्यस्मिन्द्विपदोवितथस्तथा ॥ द्विपदौदक्षिणाशास्थौगृहक्षतयमावुभौ ॥ १० ॥ गन्धर्वमृगराजौतुद्विपदौपरिकीर्तितौ ॥
मृगःपितृगणश्चैवदौवारिकश्चैकपादकः ॥११॥ सुग्रीवपुष्पदन्तौचद्विपदावरुणस्तथा॥ असुरश्चतथाशोकोद्विपदाः परिकीर्तिताः॥१२॥
पापोरोगस्तथासर्पस्त्रयश्चैकपदामताः ॥ मुखभल्लाटसोमाख्यास्त्रिपदास्तुत्रयःस्मृताः ॥ १३ ॥

सत्य भ्रंश ये दोनों दोकोष्टके होतेहैं ॥ ८ ॥ और अन्तरिक्ष ३ एक पदका और वायुभी एक पदका कहाहै ॥९॥और पूषा एक पदका और वितथ दो पदका होताहै और दक्षिणदिशामें स्थित गृहक्षत और यम ये दोनों दो पदके होतेहैं ॥ १० ॥ गन्धर्व और मृगराज येभी दो पदके कहेहैं. मृग और पितृगण और दौवारिक ये एकपदके होते हैं ॥ ११ ॥ सुग्रीव पुष्पदन्त और वरुण ये दो पदके, असुर अशोक येभी दो पदके कहेहैं ॥ १२ ॥ पाप, रोग और सर्प ये तीनों एक पदके कहेहैं मुख भल्लाट और सोम

ये तीनोंभी एक एक पदके कहेहैं ॥ १३ ॥ सर्प और अदिति ये दोनों दोदो पदके कहेहैं और दिति एक पदकी कहीहै और बत्तीस ३२ देवता कोष्ठोंसे बाहिर स्थितहैं ॥ १४ ॥ ईशानआदि चारौं कोणोंमें जो स्थित हैं उनका पूजन बुद्धिमान् मनुष्य करै. जल और सावित्र जय और रुद्र ॥ १५ ॥ और इनके अन्तमें स्थित जो हैं इन सबको एक एक पदमें ईशान आदि दिशाओंमें स्थित करै, अर्यमा तीनपदका और सविता एकपदका होताहै ॥ १६ ॥ विवस्वान् तीनपदका दक्षिण दिशामें होताहै और इन्द्र एकपदका

सर्पश्चद्विपदः प्रोक्तोह्यदितिश्चतथैवच ॥ दितिश्चैकपदाप्रोक्ताद्वात्रिंशद्वाह्यतःस्थिताः ॥१४॥ ईशानादिचतुष्कोणेसंस्थितान्पूजयेद्बुधः॥ आपश्चैवाथसावित्रोजयोरुद्रस्तथैवच ॥ १५ ॥ तदन्तगाश्चैकपदानीशानादिषुविन्यसेत् ॥ अर्यमात्रिपदः पूर्वेसविताचतथैकपात् ॥ १६ ॥ विवस्वांस्त्रिपदोयाम्येइन्द्रश्चैकपदस्तथा ॥ नैर्ऋतेपश्चिमेमित्रस्त्रिपदःपरिकीर्तितः ॥ १७ ॥ वायव्येराजयक्ष्माचएकपादः प्रकीर्तितः ॥ उत्तरेत्रिपदापृथ्वीधरापश्चैकपात्तथा ॥ १८ ॥ मध्येनवपदोब्रह्मापीतश्वेतश्चतुर्भुजः ॥ आब्रह्मन्ब्राह्मणइतिमन्त्रोयं समुदाहृतः ॥ १९ ॥ अर्यमाकृष्णवर्णश्चअर्यम्णाचबृहस्पतिः ॥ सवितारक्तवर्णस्तुउपयामगृहीतकम् ॥ २० ॥ विवस्वाञ्छुक्लवर्णश्चविवस्वानादित्यमन्त्रतः ॥ इन्द्रोरक्तेन्द्रसुत्रामामन्त्रोयंसमुदाहृतः ॥ २१ ॥

नैर्ऋतमें और मित्र एक पदका पश्चिममें कहाहै॥१७॥ वायव्यमें एक पदका राजयक्ष्मा कहाहै उत्तरमें त्रिपदा पृथ्वी और धराय एक पादके कहेहैं ॥ १८ ॥ मध्यमें नौ ९ पदका ब्रह्मा पीत श्वेत और चतुर्भुजी कहाहै उसकी पूजाका मन्त्र आब्रह्मन्ब्राह्मणः० यह कहाहै ॥१९॥ अर्यमा कृष्णवर्णका और अर्यम्णा बृहस्पतिः०यह उसका मंत्र कहाहै. सविता(सूर्य) रक्त वर्ण और उपयाम गृहीतः०यह उसका मंत्र कहाहै॥२०॥ विवस्वान् शुक्ल वर्ण और विवस्वानादित्य० यह उसका मन्त्र कहाहै. इन्द्र रक्त और इंद्र सुत्राम० यह उसका मन्त्र कहाहै ॥ २१ ॥

मित्र श्वेत और तन्मित्रंवरुणस्याभिचक्षे० यह उसका मंत्र कहाहै और राजयक्ष्मा रक्तवर्ण और अभिगोत्राणि० यह उसका मंत्र कहाहै ॥ २२ ॥ पृथ्वीधर रक्तवर्ण और पृथ्वीछन्द० यह उसका मंत्र कहाहै, आपवत्स शुक्ल वर्ण और भवाम० यह उसका मन्त्र कहाहै ॥ २३ ॥ और उसके बाह्य देशमें आप शुक्ल वर्ण और आपोअस्मान्मातरः० यह उसका मंत्र कहाहै और सवितासे अग्निकोणके दिग्भागमें शुक्लवर्णका एकपाद कहाहै ॥ २४ ॥ और उपयाम गृहीतोसि० और सवितासि० ये उसके मंत्र कहे हैं और जयन्त श्वेत मर्माणि०

मित्रः श्वेतश्चतन्मित्रंवरुणस्याभिचक्षेत्विति ॥ राजयक्ष्मारक्तवर्णोह्यभिगोत्राणिमन्त्रतः ॥ २२ ॥ पृथ्वीधरोरक्तवर्णःपृथिवी
छन्दमन्त्रतः ॥ आपवत्सः शुक्लवर्णोभवामेतिचमन्त्रतः ॥ २३ ॥ आपः शुक्लवर्णश्चतद्बाह्येआपोअस्मान्मातरेतिच ॥
सावित्राग्नेयदिग्भागेशुक्लवर्णैकपात्तथा ॥ २४ ॥ उपयामगृहीतोसिसवितासीतिमन्त्रतः ॥ जयन्तःश्वेतोनैर्ऋत्येमर्माणिते
तिमन्त्रतः ॥ २५ ॥ रुद्रोरक्तश्चवायव्येसुत्रामाइतिमन्त्रतः ॥ ईशानेरक्तवर्णश्चतमीशानेतिवैशिखी ॥ २६ ॥ पर्जन्यः
पीतवर्णश्चमहाइन्द्रेतिवैतथा ॥ जयन्तः पीतवर्णश्चधन्वनागाइतिस्मृतः ॥ २७ ॥ कुलिशायुधः पीतवर्णोमहाइन्द्रेतिवैतथा ॥ सूर्य्यो
रक्तःसूर्यरश्मिर्हरिकेतिचमन्त्रतः ॥ २८ ॥ सत्यश्चशुक्लोव्रतेनदीक्षामाप्नोतिमन्त्रतः ॥ भृशःकृष्णोमंत्रमस्यभद्रङ्करणेभिरेवच ॥ २९ ॥
अन्तरिक्षः कृष्णवर्णोवयंसोमश्चइत्यपि ॥ वायुर्धूम्रस्तथावर्णआवायोरितिमन्त्रतः ॥ ३० ॥

इस मंत्रसे कहाहै ॥ २५ ॥ और रुद्र रक्त वायव्यदिशामें सुत्रामा ० इसऋचासे कहाहै. ईशानमें रक्तवर्णका शिखी तमीशानम्० इस मंत्रसे कहाहै ॥ २६ ॥ पीतवर्णका पर्जन्य महा इंद्र०मंत्रसे कहाहै जयंत पीतवर्णका धन्वनागा०इसमंत्रसे कहाहै ॥ २७॥ कुलिशायुध पीतवर्णका महाइन्द्र०इस मंत्रसे कहाहै. सूर्य रक्तवर्णका सूर्यरश्मिहारिक० इस मंत्रसे कहाहै ॥ २८ ॥ सत्य शुक्लवर्णका व्रतेनदीक्षामाप्नोति०इस मंत्रसे कहाहै भृश कृष्णवर्णका और इसका मंत्र भद्रं करणेभिः०यह कहाहै ॥२९॥ अन्तरिक्ष कृष्ण वर्णका और वयंसोम० यह उसका मंत्र

74

कहाहै. वायु धूम्रवर्णका और आवायो० यह उसका मंत्र कहाहै॥३०॥पूषा रक्तवर्णका और पूषन्तव० यह उसका मन्त्र कहाहै. वितथ शुक्लवर्ण का सविता प्रथम ० यह उसका मंत्र कहाहै ॥ ३१ ॥ गृहक्षत पीतवर्ण सवितात्वा ० यह उसका मंत्र कहाहै और यम दाक्षिणमें कृष्णशरीर यमायत्वामखायच ० इस मंत्रसे कहाहै ॥ ३२ ॥ गन्धर्व रक्तवर्णका और घृतद्वोवः० इस मंत्रसे कहाहै. भृंगराज कृष्णबर्णका मृत्यु सुपर्ण० इस मंत्रसे कहाहै ॥ ३३ ॥ मृग पीतवर्णका ताद्विष्णोः० इस मंत्रसे नैर्ऋत दिशामें स्थित है. पितरोंके गण रक्तवर्णके

पूषाचरक्तवर्णश्चपूषन्तवइतीरितः॥ शुक्लवर्णश्चवितथंसविताप्रथमेतिच. ॥ ३१ ॥ गृहक्षतः पीतवर्णः सवितात्वेतिमन्त्रतः ॥ यमः कृष्णवपुर्याम्येयमायत्वामखायच ॥ ३२ ॥ गन्धर्वोरक्तवर्णश्चघृतद्वोवेतिमन्त्रतः ।. भृङ्गराजःकृष्णवर्णोमृत्युःसुपर्णेतिवातथा ॥ ३३ ॥ मृगःपीतश्चतद्विष्णोर्मन्त्रेणनिर्ऋतिःस्थितः ॥ पितृगणारक्तवर्णाःपितृभ्यश्चेतिपूजयेत् ॥ ३४ ॥ दौवारिकोरक्तवर्णो द्रविणोदाःपिपीषति ॥ शुक्लवर्णश्चसुग्रीवःसुषुम्नःसूर्यरश्मिना ॥ ३५ ॥ पुष्पदन्तोरक्तवर्णोनक्षत्रेभ्येतिमन्त्रतः ॥ वरुणः शुक्लइतरोमित्रास्यवरुणास्यतः ॥ ३६ ॥ आसुरःपीतरक्तश्चयेरूपाणीतिमन्त्रतः ॥ शोकःकृष्णवपुर्मन्त्रमासवेस्वाहेत्यावाहयेत् ॥ ९३७ ॥ पापयक्ष्मापीतवर्णः सूर्यरश्मीतिमन्त्रतः ॥ रक्तवर्णस्तथारोगःशिरोमेइतिकोणके ॥ ३८ ॥

पितृभ्यश्च० इस मंत्रसे पूजित करने ॥ ३४ ॥ दौवारिक रक्तवर्ण द्रविणोदाः पिपीषति० यह उसका मंत्र कहाहै. सुग्रीव शुक्ल वर्ण सुषुम्नः सूर्यरश्मिः ० इस मंत्रसे पूजित करना ॥ ३५ ॥ पुष्पदन्त रक्तवर्ण नक्षत्रेभ्यः ० इस मंत्रसे पूजित करना वरुण शुक्ल इतरो मित्रास्यत वरुणास्यत ० इसमंत्रसे पूजित करना ॥ ३६ ॥ आसुर पीतरक्त ये रूपाणि ० इस मंत्रसे पूजित करना शोक कृष्णवर्णका उसका आसवे स्वाहा इस मंत्रसे आवाहनकरै ॥ ३७ ॥ पापयक्ष्मा पीत वर्णका सूर्यराश्मि ० इस मंत्रसे पूजित करना. कोणमें

स्थित रोग रक्तवर्ण है उसकी पूजा शिरोंमे० इस मंत्रसे करनी ॥ ३८ ॥ वायु कोणमें द्विपद रक्त उसकी पूजाका मंत्र नमोस्तु सर्पेभ्यः०यह है. मुख्य रक्तशरीर बनाना और इषेत्वा०इस मंत्रसे पूजना ॥ ३९ ॥ भल्लाटक कृष्णवर्ण बण्महाँअसि० इस मंत्रसे पूजना. श्वेतवर्णका सोम उत्तरमें स्थित होताहै उसका वयं सोम० इसमंत्रसे पूजन करना ॥ ४० ॥ सर्प कृष्णवर्णका उसका उदुत्यं जातवेदसं० इस मंत्रसे पूजन करना. अदिति पीतवर्णकी उसकी उतनोहिर्बुध्न्यन० इस मंत्रसे पूजा करनी ॥ ४१ ॥ दिति पीतवर्णकी उसकी पूजा अदितिर्द्यौ० इस मंत्रसे ईशानकोणमें करनी और ईशान आदि क्रमसे ही इनका स्था

द्विपदोहिर्वायुकोणेरक्तोनमोस्तुसर्पेभ्यश्च ॥ मुख्योरक्तवपुःकार्यइषेत्वाइतिपूजयेत् ॥ ३९ ॥ भल्लाटकःकृष्णवर्णोबण्महाँअसिमन्त्रतः ॥ सोमःश्वेतश्चोत्तरेचवयंसोमेतिमन्त्रतः ॥ ४० ॥ सर्प्पः कृष्णवपुः पूज्य उदुत्यंजातवेदसम् ॥ अदितिःपीतवर्णातुउतनोहिर्बुध्न्यमन्त्रतः ॥ ४१ ॥ दितिःपीताअदितिर्द्यौमन्त्रेणेशानकोणके ॥ ईशानादिक्रमेणैवस्थाप्याःपूज्याःस्वमन्त्रतः ॥ ४२ ॥ नाममन्त्रेणवास्थाप्याः पूज्याश्चैवयथाक्रमात् ॥ भूर्भुवःस्वेतिमन्त्रेणप्रणवाद्येननामकैः ॥ ४३ ॥ ईशानेचरकीस्थाप्याधूम्रवर्णाथवाह्यगाः ॥ ईशावास्येतिमन्त्रेणस्थाप्याः पूज्याःप्रयत्नतः ॥ ४४ ॥ विदारिकारक्तवर्णाअग्निंदूतेतिमन्त्रतः ॥ पूतनापीतहरितानमःस्वस्त्यायमंत्रतः ॥ ४५ ॥ पापराक्षसीकृष्णाभावायव्यैरितिमन्त्रतः ॥ बहिरेवचपूर्वादिक्रमेणचततोर्चयेत् ॥ ४६ ॥

पन और पूजन अपने २ मंत्रसे करना ॥ ४२ ॥ अथवा नाममंत्रसेही स्थापन पूजन क्रमसे करना अथवा ॐकार है आदि में जिसके ऐसे भूर्भुवः स्वः इस मंत्रसे नाम लेलेकर पूजन करना ॥ ४३ ॥ रेखाओंसे बाह्य देशमें ईशानकोणके विषै चरकी स्थापन करै और उसका स्थापन और पूजन बडे यत्नसे ईशावास्य० इस मंत्रसे करै ॥ ४४ ॥ विदारिका रक्तवर्ण उसका आग्निन्दूतम् इस मंत्रसे पूजन करै. पूतना पीली और हरित वर्णकी उसका नमस्स्तुत्याय० इस मंत्रसे पूजन करै ॥ ४५ ॥ पापराक्षसी कृष्णवर्णकी उसका पूजन भावाय० इस मंत्रसे करै और बहिर्देशमें पूर्वआदि क्रमसे उसके अनन्तर पूजन

करै ॥ ४६ ॥ स्कन्ध घटि रक्त और कृष्णवर्ण एह्यत्रमय० इस मंत्रसे पूजित करनी अर्यमा दक्षिणमें कृष्णवर्णका अर्यम्णा च बृहस्पति० इस मंत्रसे दक्षिण दिशामें पूजित करना ॥ ४७ ॥ पश्चिममें रक्त वर्णका जम्भक कहाहै उसका पूजन सरोभ्यो भैरवं० इस मंत्रका उच्चारण करके करै ॥ ४८ ॥ पिलिपिच्छिक पीत वर्णका उसका पूजन कारंभमर० इस मंत्रसे करै ईशानमें भीम रूप रक्त वर्णका उसका पूजन यमायत्वा० इस मंत्रसे करै ॥ ४९ ॥ त्रिपुरारि कृष्णवर्ण है उसका त्र्यम्बक इस मंत्रसे अग्निकोण में पूजन करै नैर्ऋतमें पीतवर्णका अग्निजिह्व उसका पूजन असुन्वन्त० इस मंत्रसे करै ॥ ५० ॥ कराल रक्त वर्ण उसका

रक्तकृष्णस्कंधघटीएह्यत्रमयमंत्रतः ॥ अर्यमादक्षिणेकृष्णअर्यम्णाचबृहस्पातिः ॥ ४७ ॥ पश्चिमेरक्तवर्णस्तुजंभकःपरिकीर्तितः ॥
सरोभ्योभैरवंमंत्रंसमुच्चार्यप्रपूजयेत् ॥ ४८ ॥ पिलिपिच्छिकःपीतवर्णःकारंभमरेतिमंत्रतः ॥ भीमरूपस्तथेशानेयमायत्वेतिरक्तकः
॥ ४९ ॥ त्रिपुरारिःकृष्णवर्णस्त्र्यंबकेत्वग्निकोणके ॥ अग्निजिह्वस्तुनैर्ऋत्येअसुन्वंतेतिपीतकः ॥ ५० ॥ करालारक्तवर्णातुवातोह
त्वाहणास्थितः ॥ हेतुकः पूर्वदिक्कृष्णोहेमन्तेऋतुनातथा ॥ ५१ ॥ अग्निवेतालकेयाम्येकृष्णोग्निंदूतमित्यपि ॥ कालाख्यःपश्चिमे
कृष्णोवरुणस्योत्तंभनंतथा ॥ ५२ ॥ एकपादः पीतवर्णः कुविदंगेतिचोत्तरे ॥ ईशानपूर्वयोर्मध्येगन्धमालयश्चपीतकः ॥ ५३ ॥
गन्धद्वारेतिमन्त्रेणपूज्यमानोन्तरिक्षके ॥ नैर्ऋत्यांबुद्धिमध्यस्थोज्वालास्यःश्वेतरूपधृक् ॥ ५४ ॥

पूजन वातोहत्वाहणास्थितः० इस मंत्रसे करै हेतुक पूर्व दिशामें कृष्णवर्णका उसका पूजन हेमन्ते ऋतुना० इस मंत्रसे करै ॥ ५१ ॥ अग्निवेताल दक्षिणदिशामें उसका पूजन दक्षिण दिशामें अग्निंदूतम्० इस मंत्रसे करै काल पश्चिम दिशामें कृष्णवर्णका उसका वरुणस्योत्तम्भनमसि० इस मंत्रसे पूजन करै ॥ ५२ ॥ एकपाद उत्तरमें पीत वर्णका उसका कुविदांग० इस मंत्रसे पूजन करै ईशान और पूर्व दिशाके मध्यमें पीत वर्णका गंधमाल्य होताहै ॥ ५३ ॥ उसका पूजन अन्तरिक्षमें गंधद्वारा० इसमंत्रसे

करै नैर्ऋति दिशामें बुद्धिके मध्यमें स्थित श्वेतरूपधारी ज्वालास्यहै ॥ ५४ ॥ उसका विधिसे पूजन महीद्यौः० इस मंत्रसे करै जो बाह्य देवता कहेहैं उनका पूजन प्रासादमें करै ॥ ५५ ॥ दुर्ग और देवालय और शल्योद्धारमें विशेषकर पूजन करै और चतुष्षष्टिहैं पद जिसमें ऐसे वास्तुकोभी बनावै ॥ ५६ ॥ और कलशके विषै वरुणदेवका स्थापन करै और उस कलशको तीर्थके जल और सर्व बीजोंसे पूरित करै ॥ ५७ ॥ सर्वौषधि सर्वरत्न और अनेक प्रकारके गन्ध पंच कषाय और पल्लव और मि

महीद्यौरितिमंत्रेणपूजनीयोविधानतः॥येबाह्यदेवताःप्रोक्ताःप्रासादेतान्प्रपूजयेत्॥५५॥दुर्गेदेवालयेचैवशल्योद्धारेतथैवच ॥ विशेषेणैवपूज्याश्चचतुःषष्टिपदंतथा ॥ ५६ ॥ कलशेस्थापयेद्देवंवरुणंवरुणौततः ॥ कलशम्पूरयेत्तीर्थवारिणासर्वबीजकैः ॥ ५७ ॥ सर्वौषधैःसर्वरत्नगन्धैश्चविविधैस्तथा ॥ पल्लवैःपञ्चकाषायैर्मृदाशुद्धोदकेनवा ॥ ५८ ॥ ग्रहाणाम्पूजनन्तत्रकारयेद्वेदिकोपरि ॥ मुरामांसीवचाकुष्ठंशैलेयंरजनीद्वयम् ॥ ५९ ॥ शठीचम्पकमुस्ताचसर्वौषधिगणःस्मृतः ॥ अश्वत्थोदुम्बरप्लक्षचूतन्यग्रोधसम्भवाः ॥ ६० ॥ पञ्चभङ्गाइमेप्रोक्ताः सर्वकर्मसुशोभनाः ॥ तुलसीसहदेवीचविष्णुक्रान्ताशतावरी ॥ ६१ ॥ मूलान्येतानिगृह्णीयाच्छतालाभेविशेषतः ॥ वटीर्वटोदुम्बरस्यवेतसस्यतथैवच ॥ ६२ ॥ अश्वत्थश्चैवमूलश्चपंञ्चकाषायकाः स्मृताः ॥ अश्वस्थानाद्गजस्थानाद्वल्मीकात्सङ्गमाद्ध्रदात् ॥ ६३ ॥

ट्टी इनसे पूर्णकरै वा शुद्ध जलसे पूर्ण करै ॥ ५८ ॥ और वहां वेदीके ऊपर ग्रहोंका पूजन करै मुरा जटामांसी वच कूठ चंदन दोनों हलदी ॥ ५९ ॥ शठी चम्पा नागरमोथा यह सर्वौषधियोंका गण कहाहै पीपल गूलर पिलखन आम्र और बड इनमें उत्पन्न हुए ॥ ६० ॥ पंचपल्लव कहेहैं और ये सब कर्मोंमें श्रेष्ठ होते हैं तुलसी सहदेवी विष्णुक्रान्ता शतावर ॥ ६१ ॥ यदि सौ औषधि न मिलै तो इन मूलोंको ग्रहण करै वड गूलर वैंत ॥ ६२ ॥ अश्वत्थ (पीपल) और मूल ये पंच कषाय कहेहैं

अश्वस्थान गजस्थान बमई दो नदियोंका संगम ॥६३॥ और राजद्वारका प्रवेश इनसे मट्टी मंगाकर कलशमें डारै संपूर्ण समुद्र नदी तलाव और जल देनेवाले नद ॥ ६४ ॥ ये सब यजमानके पापनाशक कलशमें आओ ॥ ६५ ॥ और कलशमें शिखी आदि पैंतालीस ४५ दोषोंका पूजन करै ॥ ६६ ॥ और वह पूजन वेदके मंत्र वा नामके मंत्र ॐकार वा व्याहृतियोंसे करना और हस्तभर प्रमाणके तीन मेखलावाले कुण्डमें होम करना ॥ ६७ ॥ और जौं कालेतिल समिध और क्षीरवृक्ष पालाश खादिर अपामार्ग गूलर इनसे होमकरै ॥ ६८ ॥ अ

राजद्वारप्रवेशाच्चमृदमानीयनिक्षिपेत् ॥ सर्वेसमुद्राःसरितःसरांसिजलदानदाः ॥ ६४ ॥ आयान्तुयजमानस्यदुरितक्षयकारकाः ॥ ६५ ॥ शिख्यादिपंचचत्वारिंशद्दोषांस्तत्रप्रपूजयेत् ॥ ६६ ॥ वेदमन्त्रैर्नाममन्त्रैःप्रणवव्याहृतिभिस्तथा ॥ होमस्त्रिमेखलैकार्यः कुण्डेहस्तप्रमाणके ॥ ६७ ॥ यवैः कृष्णतिलैस्तद्वत्समिद्भिःक्षीरवृक्षकैः ॥ पालाशैः खादिरैर्वापामार्गोदुम्बरसम्भवैः ॥ ६८ ॥ कुशदूर्वामयैर्वापिमधुसर्पिःसमन्वितैः ॥ कार्यस्तुपञ्चभिर्बिल्वैर्बिल्वबीजैरथापिवा ॥ ६९ ॥ होमान्तेभक्ष्यभोज्यैश्चवास्तुदेशेबलिं हरेत् ॥ नमस्कारान्तयुक्तेनप्रणवाद्येनसर्वतः॥७०॥ वेदोक्तैर्वमन्त्रेणसम्पूज्या देवताः क्रमात् ॥ ततोव्याहृतिभिर्होमः स्विष्टकृद्धोममेवच ॥ ७१ ॥ पूर्णाहुतिश्चजुहुयात्संस्रवप्राशनन्ततः ॥ वास्तुमण्डलदेवेभ्योबलिन्दद्याद्विधानतः ॥ ७२ ॥ घृतान्नंशिखिनेदद्यात्पर्जन्यायचसोत्पलम् ॥ जयन्तादिवास्तुमण्डलदेवेभ्योबलिन्ततः ॥ ७३ ॥

थवा सहत मिलीहुई कुशा और दूवसे घृत मिलाकर करै अथवा पांचवेल वा बेलकी चीजोंसे करै ॥ ६९ ॥ होमके अन्तमें भक्ष्य और भोज्योंसे वास्तुदेशमें नमस्कार जिसके अन्तमें और ओंकार जिसकी आदिमें हो ऐसे मंत्रसे बलिको दे ॥ ७० ॥ क्रमसे वेदोक्तमंत्रोंसे देवताओंका पूजन करै फिर व्याहृतियोंसे होम करै और स्विष्टकृत् होमको करै ॥ ७१ ॥ फिर पूर्णाहुतिका हवन करै और संश्रवका प्राशन अर्थात् स्रुवेके घीका भक्षण करै और विधिसे वास्तुमण्डलदेवताओंको बलि दे ॥ ७२ ॥ शिखीको घृतान्न दे और पर्जन्यको

घृतान्न और कमलकी बलिदे फिर जयन्तआदि वास्तुमण्डलदेवताओंको बलि दे ॥ ७३ ॥ कुलिशायुधको पंचरत्न और पुष्टिके पदार्थ दे सूर्यको कुशा और धूम्र रक्त चंदोवा अपूप और सत्तु दे ॥ ७४ ॥ सत्यको घी और गेहुं दे और भृशको मत्स्य और अन्न दे अन्तरिक्षको शष्कुलि (पूरी) और पक्षीयोंका मांस दे ॥ ७५ ॥ वायसको सत्तु और पूषाको लाजा (खील) बुद्धिमान् मनुष्योंने कही हैं वितथको चणकान्न और गृहक्षतको मधवन्नदे ॥ ७६ ॥ यमको पिशितान्न (मांस) गन्धर्वको गन्धौदन और भृंगराजको मीढे के जिव्हाकी बलि दे ॥७७॥ मृगको और नीलपदको जौकी बलि दे पितर और दौवारिकको कृशरान्न (खिचडी) की बलि दे ॥७८॥ और

कुलिशायुधायपञ्चरत्नंपौष्टिकसंभवम् ॥ कौशंसूर्यायधूम्ररक्तवितानापूपसक्तवैः ॥ ७४ ॥ सत्यायघृतगोधूमंमत्स्यान्नञ्चभृशायच ॥ अन्तरिक्षायशष्कुलीमांसंवापिचशाकुनम् ॥ ७५ ॥ वायसेसक्तवःप्रोक्ताःपूष्णेलाजाःस्मृताबुधैः ॥ वितथायचणकान्नमध्वन्नञ्चगृहक्षते ॥७६॥यमायपिशितान्नन्तुगन्धर्वायगन्धौदनम् ॥ भृङ्गराजायमेषस्यजिह्वायाश्चबलिंहरेत् ॥ ७७ ॥ मृगाययावकन्दद्याद्वलिन्नीलपदस्तथा ॥ पितृभ्यःकृशरान्नञ्चतथादौवारिकायच ॥ ७८ ॥ दन्तकाष्ठंकृष्णपिष्टंदन्तधावनमेवच ॥ सुग्रीवायअपूपञ्चयावकन्तुतथैवच ॥ ७९ ॥ पुष्पदन्तायपायसंवरुणायतथैवच ॥ कुशस्तम्भञ्चयमञ्चपैष्टंहैरणमयन्तथा ॥ ८० ॥ असुरायसुराप्रोक्ताशोषायचघृतौदनम् ॥ गोधार्थीवैयक्ष्मणेचरोगायघृतमोदनम् ॥ ८१ ॥ अहयेफलपुष्पाणिनागकेशरइत्यपि ॥ मुख्यायघृतगोधूमंभल्लाटेमुद्गमोदनम् ॥ ८२ ॥ सोमायपायसघृतंनागेपौष्टिकशालकम् ॥ अदित्यैपौलिकादित्यैपूरिकायाबलिःस्मृतः ॥ ८३ ॥

सुग्रीवको दतोन कृष्णचूर्ण दांत और काष्ठ पूडे और जौं इनकी बलि दे ॥ ७९ ॥ पुष्पदन्त और वरुणको पायस (खीर) की बलि दे और यमको कुशाका स्तंभ पिठी और सुवर्णकी बलि दे ॥ ८० ॥ असुरको मदिराकी बलि और शोषको घृतौदनकी बलि कहीहै पापयक्ष्माको गोहकी और रोगको घी और ओदनकी बलि दे ॥ ८१ ॥ अहिको फल पुष्प और नागकेसरकी बलि दे मुख्यको घी और गेहुंकी भल्लाटको मूंगओदनकी बलिदे ॥ ८२ ॥ सोमको पायस और घीकी नागको पुष्टिके पदार्थ और शालीयोंकी अदितिको पोली

यों की अर्थात् रोटीयोंकी और दितिको पूरीयोंकी बलि कहीहै॥८३॥और जलोंको दूध और सविताको कुशौदन देना और जयको लड्डू और मिर्च दे और घी और चंदन ॥ ८४ ॥ रुद्रको दे पायस और गुड अर्यमाको और खांड मिला हुआ पायसभी अर्यमाको दे और सविताको गुड और अपूपोंकी बलि कहीहै ॥८५॥ विवस्वान्‌को रक्तचंदन और पायसकी बलि दे और इन्द्रको घी सहित हडताल और ओदनकी बलि दे ॥८६॥ मित्रको घृतौदन कच्चे मांस और सहतकी बलि दे राजयक्ष्मा पृथ्वीधर और मितौजस इनको ॥८७॥ मांस और कूष्माण्डकी बलि दे और आपवत्सको दधिकी बलि दे ब्रह्माको पंचगव्य जौं तिल अक्षत दधि इनकी बलि दे ॥ ८८॥ और अनेक प्रकारके भक्ष्य

अद्भ्योपिक्षीरञ्चतथासावित्रेचकुशौदनम् ॥ लड्डुकंमरिचञ्चैवजयायघृतचन्दनम् ॥ ८४ ॥ रुद्रायपायसगुडमर्यम्णेशर्करान्वितम् ॥ पायसञ्चसवित्रेतुगुडापूपबलिःस्मृतः ॥ ८५ ॥ विवस्वतेतथादेयंरक्तचंदनपायसम् ॥ इन्द्रायसघृतंदेयंहरितालौदनन्तथा ॥ ८६ ॥ घृतौदनञ्चमित्रायआममांसंमधुस्तथा ॥ राजयक्ष्मणेचपृथ्वीधरायचमितौजसे । ८७ ॥ मांसानेकूष्माण्डमितिआपवत्साय वैदधि ॥ ब्रह्मणेपञ्चगव्यंचयवन्तिलाक्षतन्दधि ॥ ८८ ॥ विविधान्भक्ष्यभोज्यांश्चफलानिविविधानिच ॥ एवंदत्त्वाबलिंसम्यग्दद्यात्तेभ्यो हिरण्मयम् ॥८९॥ प्रणवाद्यैश्चतुर्थ्यन्तैर्नाममन्त्रेणमन्त्रवित् ॥ सर्वेभ्योपिहिरण्यञ्चब्रह्मणेगांपयस्विनीम् ॥ ९० ॥ अथवापायसंदद्यात्सर्वेभ्यश्चसदीपकम् ॥ ततोबाह्यस्थितानान्तुबलिन्दद्याद्विधानतः ॥ ९१ ॥ चरक्यैमाषभक्तञ्चसघृतंपद्मकेशरम् ॥ हविश्चैवतथाग्नेयेवितानकविदारिके ॥ ९२ ॥

भोज्य और अनेक प्रकारके फल सम्पूर्ण देवताओंको दे इस पूर्वोक्त रीतिसे भली प्रकार बलि देकर संपूर्ण देवताओंको सुवर्ण दे ॥८९ ॥ और ये संपूर्ण ॐकार जिनकी आदिमें और चतुर्थीविभक्ति जिनके अन्तमें ऐसे नाममंत्रोंसे मंत्रके ज्ञाताको देने और सब देवताओंको सुवर्ण देना और ब्रह्माको दूध देती हुई गौको दे ॥ ९० ॥ अथवा सब देवताओंको दीपक सहित पायस दे फिर विधिसे बाह्यमें स्थित देवताओं को बलिदे ॥ ९१ ॥ चरकीको उडदोंका भक्त और घीसहित पद्मकेशर और हवि दे और अग्निकोणमें विदारिकाको चंदोवा ॥ ९२ ॥

माषभक्त रुधिर और हरिद्राभक्त दे और नैर्ऋतमें पूतनाको माषभक्तसे मिले हुए ॥९३॥ रुधिर अस्थि और पीत रक्तकी बलि पूतना देवीको निवेदन करै और वायव्यमें पापराक्षसीको मत्स्यका मांस और सुरासवका निवेदन करै ॥ ९४॥ फिर पूर्व आदि दिशाओंमें स्कंधको रुधिर और सुरा दे दक्षिणमें अर्यमाको माषभक्त निवेदन करै ॥९५॥ पश्चिममें जंभकको मांस और रुधिर दे उत्तरमें पिलिपिच्छको रुधिरकी बलि कहीहै ॥९६॥ इन पूर्वोक्त देवताओंको विधिसे बलि दे और तिसीप्रकार प्रासाद आदिमें इनको भलीप्रकार बलि दे॥९७॥ ईशानमें भीमरोगको

माषभक्तंसरुधिरंहरिद्राभक्तमेवच ॥ नैर्ऋत्याञ्चपूतनायैमाषभक्तेनसंयुतम् ॥ ९३ ॥ रुधिरास्थिपीतरक्तम्बलिन्देव्यैनिवेदयेत् ॥
वायव्येपापराक्षस्यैमत्स्यमांससुरासवम् ॥ ९४ ॥ ततःप्रागादितोदिक्षुस्कंदायरुधिरंसुराः ॥ अर्यम्णेमाषभक्तञ्चदक्षिणेविनिवेदयेत्
॥ ९५ ॥ जंभकायतथामांसंरुधिरंपश्चिमेन्यसेत् ॥ पिलिपिच्छकायोत्तरेचअसृग्यमबलिःस्मृतः ॥ ५९६ ॥ इत्येतेषान्देवतानाम्ब
लिन्दद्याद्विधानतः ॥ प्रासादादौतथैतेषाम्बलिन्दद्यात्प्रयत्नतः ॥ ५९७ ॥ भीमरूपायईशानेकपोतकसुराबलिः ॥ वसारुधिरमां
सानांकृशरायास्तथैवच ॥९८॥ आग्नेयादितिसन्धारीत्रिपुरान्तकरूपधृक् ॥ अग्निजिह्वस्तुनैर्ऋत्येदुग्धंसैंधवसंयुतम् ॥ ९९॥ मांसञ्चरु
धिरन्देयन्तस्मैदिकपालिनेनमः॥करालिकेपक्वमांसंरुधिरंसैन्धवम्पयः ॥ ६००॥ हेतुकेपूर्वदिग्भागेबलिःस्यात्पायसंह्यसृक् ॥ अग्निवैता
लिकेयाम्येरुधिरंमांसमेवच ॥ १ ॥ कालाख्ये पश्चिमेदद्याद्बलिंमांसौदनस्यच ॥ एकपादेउत्तरस्यांकृशरायाबलिस्तथा ॥ २ ॥

कपोत और सुराकी बलि दे और वसा रुधिर मांस और कृशर अन्नकी बलिभी दे ॥ ९८ ॥ आग्नेयमें अदिति सन्धारि त्रिपुरान्तक रूपधृक् और नैर्ऋतमें अग्निजिह्व को सैन्धव मिलै दूधकी बलि दे ॥ ९९ ॥ और मांस रुधिरकी बलि उस दिक्पाल को नमस्कारहै यह कह करदे करालिकको पकायाहुआ मांस रुधिर सैन्धव और दूधकी बलि दे ॥ ६०० ॥ हेतुकको पूर्वा दिशामें पायस और रुधिर की बलि होतीहै अग्नि वैतालिकको दक्षिणमें रुधिर मांसकी बलि दे॥ १ ॥ पश्चिममें कालाख्य

को मांसौदनकी बलिदे उत्तरमें एकपादको कृशरकी बलि दे ॥ २ ॥ अग्नि और पूर्वके मध्यमें वितानकको गन्धमाल्य दे नैर्ऋत और पश्चिमके मध्यमें ज्वालास्य देवता कहाहै ॥ ३ ॥ उसको दही अक्षतोंसे युक्त मोदकोंकोदे दिक्पालों को बलि देकर फिर क्षेत्र पालको आगमोक्तमंत्र वा वेदोक्त मंत्रसे बलि दे ॥ ४ ॥ क्षेत्रपालकी बलिका मंत्र यह है कि भगवान् क्षेत्रपालको नमस्कारहै और तेतीसकोटि देवताओंके अधिपतिको और भारके जेताको और प्रकाशमान् त्रिनेत्रको और अपने अंगमें किंकिणी ज्वालामुख भैरवको तुरु मुरुमुरुललषषषषकेंकार दुरित दिङ्मुख रूप हे महाबाहो! आज करने योग्य वास्तुकर्ममें अमुक

आग्नेयपूर्वयोर्मध्येगन्धमाल्यैर्वितानकम् ॥ नैर्ऋत्यपश्चिमान्तस्थोज्वालास्यःपरिकीर्तितः ॥ ३ ॥ तस्मैदध्यक्षतयुतंमोदका निवदापयेत् ॥ दिक्पालानाम्बलिन्दत्त्वाक्षेत्रपालबलिन्ततः ॥ ६०४ ॥ आगमोक्तेनमन्त्रेणवेदमन्त्रेणवैतथा ॥ नमोभ गवतेक्षेत्रपालायत्रयस्त्रिंशत्कोटिदेवाधिदेवायनिर्जितायभारभासुरित्रिनेत्रायस्वाङ्गकिङ्किणिज्वालामुखभैरवरूपिणेतुरुमुरुमुरुललषषष षषकेङ्कारदुरितदिङ्मुखमहाबाहोअद्यकर्तव्येवास्तुकर्मणिअमुकंयजमानंपाहिपाहिआयुष्कर्ताक्षेमकर्ताभव अमुंपशुंदीपसहितंमुण्डं माषभक्तबलिंगृह्णगृह्णस्वाहा ॥ ६०५ ॥ इतिबलिंदत्त्वा ॥ नैर्ऋत्यान्दिशिभूतेभ्योसन्ध्याकालेविशेषतः ॥ बलिंदद्याद्विधानेनम न्त्रविन्नक्तभुग्यमी ॥ पुरोहितस्तथायाज्यंगुडौदनमथापिवा ॥ ६०६ ॥ कुल्माषेणतुसम्मिश्रैर्यावकापूपसंयुतैः ॥ बहुपक्वान्नसं युक्तैर्बालक्रीडनकैस्तथा ॥ ६०७ ॥ फलैश्चदाडिमीबीजैःकालपुष्पैर्मनोरमैः ॥ मात्राननाशनमिताबलिकर्मणिचोदिताः ॥ ६०८ ॥

नाम यजमानकी रक्षा करो आयुका कर्ता कुशलका कर्ता और दीपक सहित इस पशुको और माषभक्त बलिको ग्रहण करो करो २ स्वाहा० इस मंत्रसे क्षेत्रपालको बलि देकर ॥ ५ ॥ संध्याके समयमें नैर्ऋत दिशामें भूतोंको शास्त्रोक्त विधानसे बलिको मंत्रका ज्ञाता दे और रात्रिमें भोजन करै संयमसे रहै और पुरोहित यजमान गुडौदन ॥ ६ ॥ कुलमाष (रनास) जिनमें मिलाहो ऐसे जो और अपूप और बहुतसे पक्वान्न जिनमें मिले हों और बालकोंके खिलोंने ॥ ७ ॥ फल अनारके बीज और मनो

हर समयके फूल इनकी मात्रा जो भोजनके योग्य न हों अर्थात् अल्प अल्प बलिकर्ममें कहीहै ॥ ८ ॥ उनके मंत्र ये हैं कि देवी देवता मुनींद्र त्रिभुवनके पति दानव सर्व सिद्ध यक्ष राक्षस नाग गरुड हैं मुख्य जिनमें ऐसे पक्षी गुह्यक देवताओंके देव डाकिनी देवताओंकी वेश्या हरि समुद्रके पति मातर विघ्ननाथ प्रेत भूत पिशाच पितृगण और नगर आदिके अधिपति और क्षेत्रपाल ॥ ९ ॥ गन्धर्व और संपूर्ण किन्नर जटाधारी पितर ग्रह कूष्माण्ड पूतना रोग ज्वर वैतालिक शिव ॥ १० ॥ रुधिर से युक्त और पिशुन (चुगल) और अनेक प्रकारके मांसके भक्षक और लम्बक्रोड और दीर्घ शुक्र ॥११॥ खञ्ज (लँगडे) स्थूल एकाक्ष और

मन्त्राः ॥ देव्योदेवामुनीन्द्राभूभुवनपतयोदानवाःसर्वसिद्धा यक्षारक्षांसिनागागरुडमुखखगागुह्यकादेवदेवाः ॥ डाकिन्योदेववेश्याहरिदधिपतयोमातरोविघ्ननाथाः प्रेताभूताः पिशाचाः पितृवननगराद्याधिपाः क्षेत्रपालाः ॥ ६०९ ॥ गन्धर्वाः किन्नरास्सर्वे जटिलाः पितरोग्रहाः ॥ कूष्माण्डाः पूतनारोगाज्वरावैतलिकाः शिवाः ॥ ६१० ॥ असृक्प्लुताश्चपिशुनाभक्षमांसान्यनेकशः ॥ लम्बक्रोडास्तथाह्रस्वा दीर्घाःशुक्रास्तथैवच ॥ ६११ ॥ खंजाः स्थूलास्तथैकाक्षानानापक्षिमुखास्तथा ॥ व्यालास्याउष्ट्रवक्राश्च अवक्राःक्रोडवर्जिताः ॥ ६१२ ॥ धमनाभास्तमालाभाद्विपाभामेघसन्निभाः ॥ गवलाभाःक्षितिनिभाअशनिस्वनसन्निभाः ॥ ६१३ ॥ द्रुतगाश्चमनोगाश्चवायुवेगसमाश्चये ॥ बहुवक्राबहुशिराबहुबाहुसमन्विताः ॥ ६१४ ॥

अनेक प्रकारके वे जिनके पक्षियोंके समान मुख हों सर्पके समान जिनके मुख हों और उष्ट्रमुख और मुखसे हीन और क्रोड (छाती) से हीन ॥ १२ ॥ धमनके समान जिनकी कान्ति और तमालके समान जिनकी कान्ति है और जो मेघकी समान जिनकी कान्ति बगलेके समान और क्षितिके तुल्य और वज्रके शब्दके समान है शब्द जिनका ॥ १३ ॥ शीघ्रगामी पवनके समान जिनका वेग और वायुके तुल्य जिनका वेग है जिनके अनेक मुख हैं अनेक शिर हैं और अनेक भुजाओंसे

जो शुक्रहैं ॥ १४ ॥ जिनके बहुत पाद हैं और बहुत नेत्र जिनके है और जो संपूर्ण भूषणोंसे भूषित हैं जिनका विकट रूप है और जो मुकुटके धारी हैं और जो रत्नके धारी हैं ॥ १५ ॥ जिनका कोटियों सूर्यके समान तेज है और जिनका बिजलीके समान तेज है जिनका कपिल रंग है और जिनका अग्निके समान वर्ण है और जो अनेक रूपके प्रमथहैं ॥ १६ ॥ ये संपूर्ण बलिको ग्रहण करो और तृप्त होकर जाओ उनके प्रति नमस्कारहै फिर आचार्य मंत्रोंसे अभिमंत्रित कियेहुए कलशको लेकर

बहुपादाबहुदृशः सर्प्पाभरणभूषिताः ॥ विकटामुकुटाःकेचित्तथावैरत्नधारिणः ॥ ६१५ ॥ सूर्यकोटिप्रतीकाशाविद्युत्सदृशवर्चसः ॥ कपिलाहुतभुग्वर्णाःप्रमथाबहुरूपिणः॥६१६॥गृह्णन्तुबलयस्सर्वेतृप्तायान्तुबलिर्नमः॥आचार्यस्तुततोनीत्वाकलशंमन्त्रमन्त्रितम् ६१७॥ स्वयम्प्रत्यङ्मुखोभूत्वाप्राङ्मुखंयजमानकम् ॥ स्वशाखोक्तेनमन्त्रेणआगमोक्तेनवातथा ॥ ६१८ ॥ स्नापयेत्कुम्भतोयेनमंत्रैः पौराणिकैस्तथा ॥ वैदिकैर्वातथामन्त्रैः सवस्त्रस्थः कुटुम्बवान् ॥ ६१९ ॥ सदारपुत्रमेतस्ययजमानस्यऋत्विजः ॥ सुरास्त्वामभिषिञ्चन्तुयेचसिद्धाः पुरातनाः ॥ ६२० ॥ ब्रह्माविष्णुश्चशम्भुश्चसाध्याश्चसमरुद्गणाः ॥ आदित्यावसवोरुद्राअश्विनौचभिषग्वरौ ॥६२१॥ अदितिर्देवमाताचस्वाहासिद्धिः सरस्वती ॥ कीर्तिर्लक्ष्मीर्धृतिः श्रीश्चसिनीवालीकुहूस्तथा ॥ ६२२ ॥

॥ १७ ॥ और आप पश्चिमको मुख करके पूर्वाभिमुख बैठेहुए यजमानको अपने शाखामें कहे और वेदमें कहे मंत्रसे ॥ १८ ॥ और पौराणिकमंत्रोंसे और वेदके मंत्रोंसे वस्त्र और कुटुम्ब सहित पूर्वोक्त यजमानको घटके जलसे स्नान करवावै ॥ १९ ॥ स्त्री और पुत्रसहित यजमानको ऋत्विजभी स्नान करवावै देवता और जो पुरातन सिद्ध हैं वे भी यजमान आपका अभिषेक करो ॥ २० ॥ ब्रह्मा विष्णु शंभु साध्य मरुद्गण आदित्य वसु रुद्र और वैद्योंमें उत्तम अश्विनी कुमार ॥ २१ ॥ देवताओंकी माता अ

दिति स्वाहा सिद्धि सरस्वती कीर्ति लक्ष्मी द्युति श्री सिनीवाली और कुहू ॥ २२ ॥ और दिति सुरसा विनता और कद्रू और जो देवताओंकी पत्नी शास्त्रोंमें कहीहैं और देवताओंकी माता ॥ २३ ॥ भो यजमान ये सब आपका अभिषेक करो और शुभ अप्सराओंके गण नक्षत्र और मुहूर्त और अहोरात्रकी संधि ॥ २४ ॥ सम्वत्सर जिनके स्वामी कला काष्ठा क्षण और लव और शुभदायी कालके अवयव भो यजमान ये सब आपका अभिषेक करो ॥ २५ ॥ ये देवता और अन्य जो वेदव्रतमें परायण मुनि हैं वे

दितिश्चसुरसाचैवविनताकद्रुरेवच ॥ देवपत्न्यश्चयाः प्रोक्तादेवमातरएवच ॥ ६२३ ॥ सर्वास्त्वामभिषिञ्चन्तुशुभाश्चाप्सरसाङ्गणाः॥ नक्षत्राणिमुहूर्त्ताश्चयाश्चाहोरात्रसन्धयः ॥ ६२४ ॥ सम्वत्सरादिनेशाश्चकलाकाष्ठाक्षणालवाः ॥ सर्वेत्वामभिषिञ्चन्तुकालस्यावयवाः शुभाः ॥ ६२५ ॥ एतेचान्येचमुनयोवेदव्रतपरायणाः ॥ सशिष्यास्तेभिषिंचन्तुसदानाश्चतपोधनाः ॥ ६२६ ॥ वैमानिकाः सुरगणाः सरवैः सागरैः सह ॥ मुनयश्चमहाभागानागाः किम्पुरुषाः खगाः ॥ ६२७ ॥ वैखानसामहाभागाद्विजावैहायनाश्चये ॥ सप्तर्षयः सदाराश्चध्रुवस्थानानियानि च ॥ ६२८ ॥ मरीचिरत्रिः पुलहः पुलस्त्यः क्रतुरङ्गिराः ॥ भृगुः सनत्कुमारश्चसनको थसनन्दनः ॥ ६२९ ॥ सनातनश्चदक्षश्चजैगीषव्योभगन्दनः ॥ एकतश्चद्वितश्चैवत्रितोजाबालिकश्यपौ ॥ ६३० ॥ दुर्वासादुर्विनीतश्चकण्वः कात्यायनस्तथा ॥ मार्कण्डेयोदीर्घतपाः शुनःशेपोविदूरथः ॥ ६३१ ॥

शिष्यों सहित दानी और तपोधन भो यजमान आपका अभिषेक करो ॥ २६ ॥ विमानमें स्थित देवताओंके गण शब्दायमान समुद्र महाभागी मुनि-नाग-किंपुरुष-खग ॥ २७ ॥ महाभागी वैखानस और आकाशगामी पक्षी और स्त्रियों सहित सप्त ऋषि और जो ध्रुवस्थानहैं ॥ २८ ॥ मरीचि अत्रि पुलह पुलस्त्य क्रतु अंगिरा भृगु सनत्कुमार सनक सनंदन ॥ २९ ॥ सनातन दक्ष जैगीषव्य भगन्दन एकत द्वित त्रित जाबालि और कश्यप ॥ ६३० ॥ दुर्वासा दुर्विनीत कण्व कात्यायन और दीर्घ है तप जिसका ऐसे मार्कण्डेय शुनःशेफ

86

और विदूरथ ॥ ३१ ॥ और्व संवर्तक च्यवन अत्रि पराशर द्वैपायन यवक्रीत और अनुजोंसहित देवराज ॥३२॥ पर्वत वृक्ष वल्ली और पुण्य स्थान प्रजापति दिति और विश्वकी माता गौ ॥ ३३ ॥ दिव्य वाहन और संपूर्ण चराचर लोक अग्नि पितर तारा मेघ आकाश दिशा जल ॥ ३४ ॥ ये और वेदके व्रतमें परायण अन्य बहुतसे ऋषि इन्द्रसहित देवताओंके गण और जिनका पुण्य यश कीर्तन है वे सब ॥ ६३५ ॥ सम्पूर्ण उत्पातोंकी शान्तिके लिये जलोंसे आपका उसप्रकार अभिषेककरो जै

और्वः संवर्तकश्चैवच्यवनोत्रिः पराशरः ॥ द्वैपायनोयवक्रीतोदेवराजः सहानुजः ॥ ६३२ ॥ पर्वतास्तरवोवल्ल्यः पुण्यान्यायतनानिच ॥ प्रजापतिर्दितिश्चैवगावोविश्वस्यमातरः ॥ ६३३ ॥ वाहनानिचदिव्यानिसर्वेलोकाश्चराचराः ॥ अग्नयः पितरस्ताराजीमूताः खंदिशोजलम् ॥ ६३४ ॥ एतेचान्येचबहवोवेदव्रतपरायणाः ॥ सेन्द्रादेवगणाःसर्वेपुण्यश्रवणकीर्तनाः ॥ ६३५ ॥ तोयैस्त्वामभिषिञ्चन्तुसर्वोत्पातनिवर्हणे ॥ यथाभिषिक्तोमघवानेतैर्मुदितमानसैः ॥ ६३६ ॥ इत्येतैश्चार्थकल्पाभिः सहितैः समरुद्गणैः ॥ अभिषेकम्प्रकुर्वीतमन्त्रैः पौराणिकैस्तथा ॥ ६३७ ॥ ततः शुद्धोदकैः स्नानंयजमानस्यकारयेत् ॥ वास्तुमण्डलमध्येतुब्रह्मस्थानेप्रपूजयेत् ॥ ६३८ ॥ सुरूपांपृथिवींदिव्यरूपाभरणसंयुताम् ॥ स्त्रीरूपांप्रमदावेशधारिणींसुमनोहराम् ॥ ६३९ ॥ महाव्याहृतिपूर्वेणपूजयेत्तांधरांपुनः ॥ धारयेतिचमन्त्रेणसम्प्रार्थ्यचपुनः पुनः ॥ ६४० ॥

से प्रसन्न मनसे इन्होंने इन्द्रका अभिषेक कियाहै ॥ ३६ ॥ अर्थके जाननेमें समर्थ इन देवताओंका नाम लेकर मरुद्गण सहित पुराणके मंत्रोंसे अभिषेक करो ॥ ३७ ॥ फिर शुद्धजलोंसे यजमानको अभिषेक करावै फिर वास्तुमण्डलके विषे ब्रह्माके स्थानमें उस पृथ्वीका पूजनकरै ॥ ३८ ॥ जिसका सुन्दर रूप और जो दिव्यरूप और आभरणोंसे युक्त है जो स्त्रीरूप है और प्रमदावेष को धारण कररहीहै और जो भलीप्रकार मनोहर है ॥३९॥ महाव्याहृति है पूर्व जिसके ऐसे उस मंत्रसे पृथ्वीका पूजन करै और धारय०-

इसमंत्रसे भलीप्रकार प्रार्थना करके ॥ ६४० ॥ वास्तु सर्वदेवतारूपहै और वास्तु देवतारूप परमेश्वर है फिर अपने अपने नाममंत्रोंसे ध्यान करिके पूजन करै ॥ ४१ ॥ फिर प्रजाके ईश्वर चतुर्मुख देवका आवाहन करै फिर गन्धआदिसे उसका वारम्वार पूजन और प्रणाम करिके कहै कि ॥ ४२ ॥ हे वास्तुपुरुष हे भूमिशय्यामें रत हे प्रभो ! आपको नमस्कार है मेरे घरमें धनधान्य आदिकी वृद्धिको सदैव करौ ॥ ४३ ॥ फिर स्वस्तिवाचन कराकर और कर्क (करवा) को ग्रहणकरिकै सूत्रके मार्गसे और प्रदक्षिण क्रमसे जलकी धार

सर्वेदेवमयोवास्तुवास्तुदेवमयंपरम् ॥ ततः स्वनाममन्त्रेणध्यात्वातत्रचपूजयेत् ॥ ६४१ ॥ ततश्चतुर्मुखंदेवंप्रजेशंचाह्वयेत्ततः ॥ गन्धादिभिश्चतंपूज्यप्रणम्यचपुनः पुनः ॥ ६४२ ॥ वास्तुपुरुषनमस्तेस्तुभूमिशय्यारतप्रभो ॥ मद्गेहेधनधान्यादिसमृद्धिंकुरुसर्वदा ॥ ॥ ६४३ ॥ वाचयित्वाततः स्वस्तिकर्करस्थंपरिगृह्यच ॥ सूत्रमार्गेणतोयस्यधाराप्रादक्षिणेनच ॥ ६४४ ॥ पातयेत्तेनमार्गेणसर्वबीजानिचैवहि ॥ सर्वबीजेजलैरेवतन्मार्गेणापिसञ्चरेत् ॥ ६४५ ॥ इतिवास्तुविधानन्तुकृत्वातांस्नानमण्डपात् ॥ ६४६ ॥ समानीयशिलान्तत्रसूत्रधारोगुणान्वितः ॥ ६४७ ॥ तत्रदिक्साधनंकुर्याद्गृहमध्येसुसाधिते ॥ ईशानादिक्रमेणैवस्वर्णकुद्दालकेनतु ॥ ६४८ ॥ खनित्वाकोणभागेतुमध्येचैवविशेषतः ॥ नाभिमात्रेतथागर्तेशिलानांस्थापनंशुभम् ॥ ६४९ ॥

